# षष्ठं सोपानम्

## प्रकीर्णाध्यायः

भानोरादित्यस्य वृश्चिकप्रवेशे ग्रीष्मसस्यानां यवादीनां वृषप्रवेशे शरत्सस्यानां धान्यादीनां बादरायणेनचार्येण सदसद्योगाः शुभाशुभा ये योगा उक्ताः कथितास्त इमे सर्वे मयाऽत्रकृता इति। एतदुक्तं भवति- यत्र दिने रवेर्वृश्चिकसंक्रमणं भवति तत्र वृश्चिकमेव लग्नं परिकल्प्य वक्ष्यमाणविधिना ग्रीष्मसस्यानां जन्म विचारणीयम्। एवं वृषसंक्रमवेलायां वृषमेव लग्नं परिकल्प्य शरत्सस्यानां जन्म विचारणीयमिति।।१।।

भानोरादित्यस्याविप्रवेशे वृश्चिकप्रवेशसमयेऽयं विचारः। केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैर्यो यत्रावधित्वेन निर्दिश्यते तस्माद्यानि केन्द्राणि लग्नचतुर्थसप्तमदशमानि तैः शुभग्रहाक्रान्तैः। शुभग्रहा बुधगुरुसिताः। अत्रावधित्वेन वृश्चिकप्रवेशावस्थितिः सवितुर्निर्दिष्टा। तस्माददित्यात् केन्द्रैः शुभगंहाक्रान्तैः सौम्यग्रहयुक्तैः। एतदुक्तं भवति – यदा सूर्यस्य वृश्चिकप्रवेशे केन्द्रस्थानानि शुभग्रहा-क्रान्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति, विशेषेण वृद्धिर्विवृद्धिः। सुवृद्धिरित्यर्थः। बलवद्भिः सौम्यैः केन्द्रवर्जमन्यत्रावस्थितैर्भानो निरीक्षिते दृष्टं ग्रैष्मिकविवृद्धिर्भवति। अत्र केन्द्रनिर्दे-शादनन्तरमेव दर्शनशब्दो निर्दिष्टः। तत्केन्द्रगतैरपि ग्रहैर्दृश्यत एव कस्मादाचार्येण दर्शननिर्देशेनैव केवलेन निर्देशः क्रियते। यदादित्यकेन्द्रावस्थितस्य ग्रहस्य कथं प्रदर्शनं घटत इत्युपगम्यापि ब्रूमः। यद्येवं तदा त्वेवं निर्देष्टुं युक्तम्। यथा बलवद्भिः सौम्यैर्दृष्टे भानौ युक्त इति, यस्मादाचार्य-सुष्ठुसमासोक्तिप्रियः परिहारः। बलवद्भिः सौम्यैर्निरीक्षित इत्यस्माद्विकल्पदिदमवगम्यते यदा सौम्यैर्बलिभिरबलिभिर्वा केन्द्रस्थानानि युक्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति। यदा तु पुनस्त्रिकोणरिपुलाभगाः सौम्या बलिनः पश्यन्ति तदा ग्रैष्मिकस्य विवृद्धिर्भवति। मध्यबलैर्याप्यता। बलहीनैर्मनागपि सस्यानां वृद्धिर्भवति। तथा च बादरायणः-

**वृश्चिकसंस्थे सूर्ये सौम्यैर्बलिभिर्निरीक्षिते वृद्धिम्।**
**तैरेव केन्द्रगैर्वा ग्रीष्मजधान्यस्य निर्दिशेन्महतीम्।। इति।।**

अर्के रवावष्टमराशिगते वृश्चिकस्थे इत्यर्थः। गुरुशशिनार्जीवचन्द्र-योर्यथाक्रमं कुम्भसिंह-संस्थयोः। कुम्भे गुरुः शशी सिंहे। अथवा सिंहघटसंस्थयोः। गुरुः सिंहे शशी घटे। तथापि ग्रीष्मसस्यस्य निष्पत्तिर्वक्तव्येति।।

## १. सस्यजातकाध्यायः

**वृश्चिकवृषप्रवेशे भानोर्ये बादरायणेनोक्त :।**

**ग्रीष्मशरत्सस्यानां सदसद्योगाः कृतास्त इमे।।१।।**

भानोरादित्यस्य वृश्चिकप्रवेशे ग्रीष्मसस्यानां यवादीनां वृषप्रवेशे शरत्सस्यानां धान्यादीनां बादरायणेनचार्येण सदसद्योगाः शुभाशुभा ये योगा उक्ताः कथितास्त इमे सर्वे मयाऽत्रकृता इति। एतदुक्तं भवति- यत्र दिने रवेर्वृश्चिकसंक्रमणं भवति तत्र वृश्चिकमेव लग्नं परिकल्प्य वक्ष्यमाणविधिना ग्रीष्मसस्यानां जन्म विचारणीयम्। एवं वृषसंक्रमवेलायां वृषमेव लग्नं परिकल्प्य शरत्सस्यानां जन्म विचारणीयमिति।

तदत्र योगप्रदर्शननार्थमाह-

**भानोरलिप्रवेशे केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैः।**

**बलवद्भिः सौम्यैर्वा निरीक्षिते ग्रैष्मिकविवृद्धिः।।२।।**

भानोरादित्यस्याविप्रवेशे वृश्चिकप्रवेशसमयेऽयं विचारः। केन्द्रैस्तस्माच्छुभग्रहाक्रान्तैर्यो यत्रावधित्वेन निर्दिश्यते तस्माद्यानि केन्द्राणि लग्नचतुर्थसप्तमदशमानि तैः शुभग्रहाक्रान्तैः। शुभग्रहा बुधगुरुसिताः। अत्रावधित्वेन वृश्चिकप्रवेशावस्थितिः सवितुर्निर्दिष्टा। तस्माददित्यात् केन्द्रैः शुभगंहाक्रान्तैः सौम्यग्रहयुक्तैः। एतदुक्तं भवति – यदा सूर्यस्य वृश्चिकप्रवेशे केन्द्रस्थानानि शुभग्रहाक्रान्तानि भवन्ति तदा ग्रैष्मिकसस्य-विवृद्धिर्भवति, विशेषेण वृद्धिर्विवृद्धिः। सुवृद्धिरित्यर्थः। बलवद्भिः सौम्यैः केन्द्रवर्जमन्यत्रावस्थितैर्भानो निरीक्षिते दृष्टं ग्रैष्मिकविवृद्धिर्भवति। अत्र केन्द्रनिर्देशादनन्तरमेव दर्शनशब्दो निर्दिष्टः। तत्केन्द्रगतैरपि ग्रहैर्दुश्यत एव कस्मादाचार्येण दर्शननिर्देशेनैव केवलेन निर्देशः क्रियते। यदादित्यकेन्द्रा-वस्थितस्य ग्रहस्य कथं प्रदर्शनं घटत इत्युपगम्यापि ब्रूमः। यद्येवं तदा त्वेवं निर्देष्टुं युक्तम्। यथा बलवद्भिः सौम्यैर्दृष्टे भानौ युक्त इति, यस्मादाचार्यसुष्ठुसमासोक्तिप्रियः परिहारः। बलवद्भिः सौम्यैर्निरीक्षित इत्यस्माद्विकल्प-दिदमवगम्यते यदा सौम्यैर्बलिभिरबलिभिर्वा केन्द्रस्थानानि युक्तानि भवन्ति तदा ग्रैष्मिकसस्यविवृद्धिर्भवति। यदा तु पुनस्त्रिकोणरिपुलाभगाः सौम्या बलिनः पश्यन्ति तदा ग्रैष्मिकस्य विवृद्धिर्भवति। मध्यबलैर्याप्यता। बलहीनैर्मनागपि सस्यानां वृद्धिर्भवति। तथा च बादरायणः- **बृ.सं.,पृ-४६०**

अथ योगान्तरमाह-

**अष्टमराशिगतेऽर्के गुरुशशिनोः कुम्भसिंहसंस्थितयोः।**

**सिंहघटसंस्थयोर्वा निष्पत्तिर्ग्रीष्मसस्यस्य।।३।।**

अर्के रवावष्टमराशिगते वृश्चिकस्थे इत्यर्थः। गुरुशशिनार्जीवचन्द्रयोर्यथाक्रमं कुम्भसिंह-संस्थयोः। कुम्भे गुरुः शशी सिंहे। अथवा सिंहघटसंस्थयोः। गुरुः सिंहे शशी घटे। तथापि ग्रीष्मसस्यस्य निष्पत्तिर्वक्तव्येति।।

अथ योगान्तरमाह-

**अर्कात् सिते द्वितीये बुधेऽथवा युगपदेव वा स्थितयोः।**

**व्ययगतयोरपि तद्वन्निष्पत्तिरतीव गुरुदृष्ट्या।।४।।**

अर्काद्रवेरलिस्थितात् सिते शुक्रे द्वितीये द्वितीयस्थानस्थे बुधेऽथवा द्वितीये। अथवा तयोर्बुधसित-योर्द्वयोरेव युगपद् द्वितीयस्थयोः। व्ययगतयोरपि। तद्वतेनैव प्रकारेण व्ययगतयोरादित्याद् द्वादशस्थाने स्थितयोः शक्रे द्वादशगे बुधे वा द्वयोर्वा द्वादशस्थानस्थितयोः सस्यानां निष्पतिर्भवति। अतीव गुरुदृष्टया। बुहस्पतिर्यदाऽऽदित्यं पश्यति तदा अतीव सस्यानां निष्पत्तिर्भवति। तथा च बादरायणः। **बृ.सं.,पृ-४६०**

अन्यद्योगान्तरमाह-

**शुभमध्येऽलिनि सूर्याद् गुरुशशिनोः सप्तमे परा सम्पत्।**

**अल्यादिस्थे सवितरि गुरौ द्वितीयेऽर्द्धनिष्पत्तिः।।५।।**

अलिनि वृश्चिके शुभमध्यस्थिते वृश्चिकात् सूर्ययुक्ताद् बुधशुक्रयोरेको द्वितीयस्थाने भवति, अन्यो द्वादशे। वा शुभमध्यगतो भवति। तथाभूतातं सूर्यादादित्याद् गुरुशशिनोर्बृहस्पतिचन्द्रयोः सप्तमस्थाने स्थितयोः परा प्रकृष्टा सम्पत् सस्यानां भवति। अल्यादिस्थ इति। अलिनि आदौ तिष्ठति अल्यादिस्थस्तस्मिन् सवितर्यादितये अल्यादिस्थे वृश्चिकप्रारम्भव्यवस्थिते गुरौ जीवे द्वितीयेऽर्द्धनिष्पत्तिः सस्यानां भवति। अर्द्ध निष्पद्यत इत्यर्थः।

अन्यद्योगान्तरमाह-

**लाभहिबुकार्थयुक्तैः सूर्यादलिगात् सितेन्दुशशिपुत्रैः।**

**सस्यस्य परा सम्पत् कर्मणि जीवे गवां चाग्र्या।।६।।**

**कुम्भे गुरुर्गवि शशी सूर्योऽलिमुखे कुजार्कजौ मकरे।**

**निष्पत्तिरस्ति महती पश्चात् परचक्रभयरोगम्।।७।।**

**मध्ये पापग्रहयोः सूर्यः सस्यं विनाशयत्यलिगः।**

**पापः सप्तमराशौ जातं जातं विनाशयति।।८।।**

**अर्थस्थाने क्रूरः सौम्यैरनिरीक्षितः प्रथमजातम्।**

**सस्यं निहन्ति पश्चादुप्तं निष्पादयेद् व्यक्तम्।।९।।**

वृश्चिकादर्थस्थाने द्वितीये क्रूरः पापग्रहो भौमसौरयोरन्यतरः, स्थितः। स च सौम्यैरनिरीक्षितो बुधजीवशुक्राणामन्यतमेनानिरीक्षतो न दृष्टः। प्रथमजातं पूर्वोत्पन्नं सस्यं निहन्ति नाशयति। तथा पश्चात् कनीयसमुप्तं तद्व्यक्तं समस्तं निष्पादयेत्। सम्भवतीत्यर्थः।।

**जामित्रकेन्द्रसंस्थौ क्रूरौ सूर्यस्य वृश्चिकस्थस्य।**

**सस्यविपत्तिं कुरुतः सौम्यैर्दृष्टौ न सर्वत्र।।१०।।**

नन्वत्र केन्द्रग्रहणेन सप्तमस्थानं गृहीतं भवति। तत्किमर्थं जामित्रग्रहणमिति ? उच्यते जामित्रग्रहणेनैत्रत्प्रतिपादयति। यथैकोऽवश्यमेव जामित्रे। अन्यो यस्मिंस्तस्मिन् केन्द्रे भवतीति तदा योग एषः। तथा च बादरायणः- **बृ.सं.,पृ-४६२**

अन्यद्योगान्तरमाह-

**वृश्चिकसंस्थादर्कात् सप्तमषष्ठोपगौ यदा क्रूरौ।**

**भवति तदा निष्पत्तिः सस्यानामर्घपहिानि :।११।।**

अर्कादादित्याद्वृश्चिकसंस्थात् क्रूरौ पापौ भौमसौरौ यदा सप्तमषष्ठोपगौ। एकः सप्तमे पर : षष्ठे भवति, तदा सस्यानां निष्पत्तिर्भवति। किन्त्वर्घस्य परिहानिः स्वल्पता। बहुमूल्येनाल्पं लभतं इत्यर्थः।।

अथ शारदसस्यानामतिदेशार्थमाह- **बृ.सं.,पृ-४६३**

**विधिनानेनैव रविर्वृषप्रवेशे शरत्सुमुत्थानाम्।**

**विज्ञेयः सस्यानां नाशाय शिवाय वा तज्ज्ञैः।।१२।।**

अनेनैव निर्दिष्टेन विधिना वृश्चिकप्रवेशोक्तेन रविरादित्यो वृषप्रवेशे वृषसंक्रमणकाले शरत्समुत्थानां शरत्समुद्भूतानां सस्यानां नाशायाभावाय शिवायं निष्पत्तये वा तज्ज्ञैः पण्डितैः सस्यजातकज्ञैर्विज्ञेयो ज्ञातव्यः। तथा च बादरायणः- **बृ.सं.,पृ-४६३**

अधुना रविचारवशेन ग्रैष्मिकसस्यस्य सामर्ध्यं महार्धतां चाह-

**त्रिषु मेषादिषु सूर्यः सौम्ययुतो वीक्षितोऽपि वा विचरन्।**

**ग्रैष्मिकधान्यं कुरुते समर्घमभयोपयोग्यं च।।१३।।**

सूर्य आदित्यः। त्रिषु मेषादिषु मेषवृषमिथुनेषु सौम्यैः शुभग्रहैर्बुधगुरुशुक्रैर्युतः संयुक्तो वीक्षितोऽवलोकितो वा विचरंस्तिष्ठन् ग्रैष्मिकं ग्रीष्मसम्भवं धान्यं समर्घं स्वल्पमूल्यं कुरुते। अभयोपयोग्यं च महार्धताऽभयोपयोग्यम्। अथवा उभयोपयोग्यमिह लोके परलोके चोपयुज्यते।

अथैवं शारदसस्यस्याप्याह-

**कार्मुकमृगघटसंस्थः शारदसस्यस्य तद्वदेव रविः।**

**संग्रहकाले ज्ञेयो विपर्ययः क्रूरदृग्योगात्।।१४।।**

रविरादित्यः कार्मुकमृगघटसंस्थः। कार्मुकं धनुः। मृगो मकरः। घटः कुम्भः। एतेषु स्थितः शारदसस्यस्य तद्वदेव ज्ञेयः। यथा त्रिषु मेषादिषु सूर्यः सौम्ययुतो वीक्षितो वा विचरन् ग्रैष्मिकधान्यं कुरुते। समर्घमभयोपयोग्यं चैवं कार्मकमृगघटसंस्थः सूर्यः सौम्ययुक्तो वीक्षितोऽपि वा विचरन् शारदधान्यं कुरुते। समर्घमभयोपयोग्यं चेति। संग्रहकाले संग्रहणसमये क्रूरदृग्योगाद्विपर्ययो ज्ञेयः। क्रूरग्रहदृष्टत्वाद्योगात् संयोगाच्च विपर्ययो विपरीतो विज्ञेयः। क्रूरावत्र भौमसौरौ। एतदुक्तं भवति –यदा मेषादिषु त्रिषु कार्मुकादिषु त्रिषु वा सूर्यः पापयुक्तः पापवीक्षितोऽपि वा विचरति तदा विपर्ययो महार्धताभयोपयोग्यत्वं च भवति। एतत्संग्रहकाले विक्रयकाले विपरीतः शोभनः। विपरीतयोगस्थे सूर्ये विक्रयः कार्य इति।।

## २. द्रव्यनिश्चयाध्यायः

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह-

**ये येषां द्रव्याणामधिपतयो राशयः समुद्दिष्टाः।**

**मुनिभिः शुभाशुभार्थं तानागमतः प्रवक्ष्यामि।।१।।**

येषां द्रव्याणां ये राशयो मेषादयोऽधिपतयो मुनिभिः काश्यपादिभिः समुद्दिष्टाः कथिताः। किथर्मं शुभाशुभार्थं समर्धमहार्धज्ञानार्थं तान् राशीनगमत् आगमात् प्रवक्ष्यामि कथयिष्यामीति।।

तत्र मेषस्य कानि द्रव्याण्येतदाह-

**वस्त्राविककुतुपानां मसूरगोधूमरालकयवानाम्।**

**स्थलसम्भवौषधीनां कनकस्य च कीर्तितो मेषः।।२।।**

वस्त्राण्यम्बराणि। अवयः प्रसिद्धा एवअ अवीनामिदमाविकं तत्सम्भूतमित्यर्थः। कुतुपं छागलोमतन्तुकृतं वस्त्रम्। मसूरगोधूमाः प्रसिद्धाः। रालको वृक्षनिर्यासः। यवाः प्रसिद्धाः। एतेषां सर्वेषाम्। तथा स्थलसम्भवौषधीनाम् ,स्थले जलरहितायां भूमौ या ओषधयः सम्भवन्ति तासाम्। तथा कनकस्य सुवर्णस्य च मेषराशिरधिपतिः कीर्तित उक्तः। तथा च काश्यपः- **बृ.सं.,पृ-४६५**

अथ वृषिमिथुनयोराह-

**गवि वस्त्रकुसुमगोधूमशालियवमहिषसुरभितनयाः स्युः।**

**मिथुनेऽपि धान्यशारदवल्लीशालूककार्पासाः।।३।।**

वस्त्राण्यम्बराणि। कुसुमानि पुष्पाणि। गोधूमाः। शालयः षष्टिकादयः। यवाः। महिषाः। सुरभितनया बलीवर्दाः। एते गवि वृषे स्युर्भवेयुः।

मिथुनेऽपीति। धान्यानि प्रसिद्धानि। शारदं शरत्समुत्पन्नं यत्किञ्चिद् द्राक्षावल्यादि। शालूकं कुमुदकन्दम्। कार्पासाः प्रसिद्धाः। एते सर्वे एव मिथुने। तथा च काश्यप:**बृ.सं.,पृ-४६६**

अथ कर्कटसिंहयोराह-

**कर्किणि कोद्रवकदलीदूर्वाफलकन्दपत्रचोचानि।**

**सिंहे तुषधान्यरसाः सिंहादीनां त्वचः सगुडाः।।४।।**

कोद्रावाः प्रसिद्धा। कदली रम्भा। दूर्वा शाद्वलम्। फलानि सर्वाणि जातीफलप्रभृतीनि। कन्दं प्रसिद्धम्। मूले बीजं यस्य तत्कन्दम्। पत्रं सुगन्धपत्रम्। चोचं पालेवतं नालिकेरं वा। एतानि सर्वाणि कर्किणि कर्कटे।

तुषधान्यानि प्रसिद्धानि। शालयः। रसा मधुराम्ललवणतिक्तकटुकषायाः षट्। सिंहादीनां प्राणिनां सिंहद्वीपिमार्जाराणां त्वचश्चर्माणि विचित्ररूपाणि। एते सगुडा गुडेन सहिताः सिंहे। तथा च काश्यपः- **बृ.सं.,पृ-४३३**

अन्य कन्यातुलयोराह-

**षष्ठेऽतसीकलायाः कुलत्थगोधूममुद्गनिष्पावाः।**

**सप्तमराशौ माषा यवगोधुमाः ससर्षमाश्चैवः।।५।।**

अतसी प्रसिद्धा। कलायः सस्यम्। कुलत्थाः गोधूमाः। मुद्गाः। एते प्रसिद्धाः। अनुत्पन्नानि यानि पुनर्जायन्ते ते निष्पावाः। निष्पावाः शालय इति केचित्। शिम्बिधान्यमिति च केचित्। एते षष्ठे कन्यायाम्। सप्तमराशाविति। माषाः। यवाः। गोधूमाः। एते किं भूताः। ससर्षपाः सर्षपसहिताः। एते सप्तमराशौ तुलायाम्। तथा च काश्यपः- **बृ.सं.,पृ-४६७**

अथ वृश्चिकधनुषोराह-

**अष्टमराशाविक्षुः सैक्यं लोहान्यजाविकं चापि।**

**नवमे तु तुरगलवणाम्बरास्त्रतिलद्यान्यमूलानि।।६।।**

इक्षुः प्रसिद्धः। सैक्यं सेकोत्थं वल्लीफालादि। लोहमायसं कांस्यं वा। एतानि तथा अजश्छगाः। अविः प्रसिद्धः,। तज्वातमविकम्। एतत्सर्वमष्टमराशौ वृश्चिके।

नवमे त्विति। तुरगा अश्ववाः। लवणं सैन्धवम्। अम्बराणि वस्त्राणि। अस्त्राण्यायुधानि धनुः शरादीनि। तिलः। धान्यम्। मूलानि प्रसिद्धानि। एतानि नवमे धनुषि। तथा च काश्यपः- **बृ.सं.,पृ-४६७**

अथ मकरकुम्भयोराह-

**मकरे तरुगुल्माद्यं सैक्येक्षुसुवर्णकृष्णलोहानि।**

**कुम्भे सलिलजफलकुसुमरत्नचित्राणि रूपाणि।।७।।**

तरवो वृक्षाः। गुल्माः प्रसिद्धाः। अकाण्डविटपा इत्यर्थः। आदिग्रहणाल्लतावल्यः। सैक्यं सेकोत्थम्। इक्षुः प्रसिद्धः। सुवर्ण काञ्चनम्। कृष्णलोहमायसम्। एतानि सर्वाणि मरके।

कुम्भ इति। सलिलजं यत्किञ्चिज्जलसम्भूतम्। फलानि प्रसिद्धानि। कुसुमानि रत्नानि चित्राणि नानाप्रकाराणि येषां रूपाणि। एतानि कुम्भे। तथा च काश्यपः- **बृ.सं.,पृ-४६७**

अथ मीन आह-

**मीने कपालसम्भवरत्नान्यम्बूद्भवानि वज्राणि।**

**स्नेहाश्च नैकरूपा व्याख्याता मत्स्यजातं च।।८।।**

कपालसम्भवानि रत्नानि मुक्ताफलानि। अम्बूद्भवानि शुक्तिसम्भवानि। वज्रं हरिकम्। नैकरूपा बहुविधाः स्नेहास्तैलादयः। मत्स्यजातं मत्स्योद्‌भूतम्। मुक्तादिकमपि। एते सर्व एव मीने व्याख्याता उक्ताः। तथा च काश्यपः। **बृ.सं.,पृ-४६८**

अथैतेषां द्रव्याणां शुभाशुभज्ञानार्थमाह-

**राशेश्चतुर्दशार्थायसप्तनवपञ्चमस्थित जीवः।**

**द्वयेकादशदशपञ्चाष्टेमेषु शशिश्च वृद्धिकरः।।९।।**

**षट्सप्तमगो हानिं वृद्धिं शुक्रः करोति शेषेषु।**

**उपचयसंस्थाः क्रूराः शुभदाः शेषेषु हानिकराः।।१०।।**

राशेश्चतुर्दशेति। यस्य कसय चोद्देशः। चतुश्चतुर्थस्थानम्। दश दशमम्। अर्थस्थानं द्वितीयमं। आयमेकादशम्। सप्तमनवमपञ्चमानि। एतेषां स्थानानामन्यतमस्थानस्थो ीवो बृहस्पतिस्तत्प्रोक्तद्रव्याणां वृद्धिकरः। द्वितीयम्। एकादशम्। दशमम्। पञ्चमम्। अष्टमम्। एतेषां स्थानानामन्यतमस्थाने स्थितः शशिजो बुधो वृद्धिकरः।

षट्सप्तमग इति। शुक्रो भार्गवः षट्सप्तमस्थानगतो हानिं क्षयं करोति। शेषेष्वनयम-स्थानेषु प्रथमद्वितीयतृतीयचतुर्थञ्चमाष्टमनवमदशमैकादशद्वादशेषु स्थितो वृद्धिं करोति। क्रूरा आदित्याङ्गा-रकशनैश्चरा उपचयसंस्थास्त्रिषडेकादशगताः शुभदा वृद्धिकराः। शेषेव्यन्यस्थानेषु प्रथमद्वितीयचतुर्थ-पञ्चमसप्तमाष्टमनवमद्वादशेषु हानिकराः। तथा च काश्यपः- **बृ.सं.,पृ-४६८**

अत्रैव विशेषमाह-

**राशेर्यस्य क्रूराः पीडास्थानेषु संस्थिता बलिनः।**

**तत्प्रोक्तद्रव्याणां महार्धता दुर्लभत्वं च।।११।।**

यस्य राशेः क्रूराः पापा रविभौमसौराः पीडास्थानेषूपचयस्थानेष्ववस्थितास्ते च बलिनो वीर्यवन्तो मित्रस्वक्षेत्रोच्चस्वनवांशकेषु स्थिताः शुभेक्षिताश्च तत्प्रोक्तद्रव्याणां तस्य राशेर्यानि

प्रोक्तानि द्रव्याणि तेषां कथितद्रव्याणां महार्धता बहुमूल्यतवं दुर्लभतवं च दुष्प्रापत्वं भवति। तथा च काश्यपः- **बृ.सं.,पृ-४६९**

अन्यदप्याह-

**इष्टस्थाने सौम्या बलिनो येषां भवन्ति राशीनाम्।**

**तद्द्रव्याणां वृद्धिः सामर्ध्यं वल्लभत्वं च।।१२।।**

येषां राशीनां सौम्याः शुभग्रहा बुधगुरुशुक्रा इष्टस्थानस्थाः। इष्टस्थानानि यथा जीवश्चतुरादिषु स्थितो बुधश्च द्वयादिषु स्थितः शुक्रः षट्सप्तमरहितेषु। एतेषु स्थानेषु बलिनो ये येषां राशीनां भवन्ति तद्द्रव्याणां तस्य राशेर्यानि द्रव्याणि तेषां सामर्ध्य समर्धता वल्लभत्वं च भवति। तथा च काश्यपः। **बृ.सं.,पृ-४६९**

अन्यदप्याह-

**गोचरपीडायामधि राशिर्बलिभिः शुभग्रहैर्दृष्टः।**

**पीडां न करोति तथा क्रूरैरेवं विपर्यासः।।१३।।**

जीवादीनां चतुरादीनि स्थानानि यान्युक्तानि तद्व्यतिरिक्तेष्वन्येषु स्थानेषु यदा स्थिता भवन्ति तदा गोचरपीडा तस्यां सत्यामपि राशिर्यदा शुभग्रहैर्बुधजीवशुक्रैर्बलिभिः सर्वार्येर्दृष्टोऽव-लोकितो भवति तदा पीडां न करोति। एतदुक्तं भवति- तद्द्रव्याणि नातिसमर्धाणि भवन्ति। क्रूरैः पापग्रहैरादित्याङ्गा-रशनैश्चरैर्बलिभिर्गोचरपीडायां यदि राशिर्दृश्यते तदा विपर्यासो विपरीतो भवति। तत्प्रोक्तद्रव्याणां महार्धता दुर्लभत्वं च भवति।

## ३. अर्घकाण्डाध्यायः

तत्रादावेव प्रयोजनसम्प्रदर्शनार्थमाह-

**अतिवृष्टियुल्कादण्डान् परिवेषग्रहणपरिधिपूर्वाश्च।**

**दृष्ट्वाऽमावास्यायामुत्पातान् पौर्णमास्यां च।।१।।**

**ब्रूयादर्धविशेषान् प्रतिमासं राशिषु क्रमात् सूर्ये।**

**अन्यतिथावृत्पाता ये ते डमरार्तये राज्ञाम्।।२।।**

अतिवृष्टिरतिवर्षणम् उल्का। तस्या लक्षणमुक्तम्- उल्का शिरसि विशाला इति। दण्डस्तस्य च लक्षणमुक्तम्- रविकिरणजलदमरुताम् इति। तथा परिवेषस्तस्य लक्षणमुक्तम्। ग्रहणमर्केन्द्वोः। परिधिः प्रतिसूर्यस्तस्य लक्षणमुक्तम्। तत्पूर्वस्तदाद्यान्। आदिग्रहणाद् रजोनीहारदिग्दाहगन्धर्वनगराणि ग्रहीतव्यानि। एतानुत्पातानमावास्यायां पौर्णमास्यां च।

दृष्ट्वाऽवलोक्यार्घविशेषान् सूर्ये आदित्ये राशिषु मेषादिषु प्रतिमासं क्रमात् परिपाटया तद् ब्रूयाद् वदेत्। अन्यस्मिस्तिथावमावास्यां पौर्णमासीं च वर्जयित्वा ये उत्पाता अतिवृष्टयादयो भवन्ति। ते राज्ञां नृपाणां डमरार्तये भवन्ति। डमरं शस्त्रकलहस्तेनार्तिः पीडा भवति। तथा च काश्यपः- **बृ.सं.,पृ-४७१**

अथोत्पातेऽमावास्यायां पौर्णमास्यां च मेषवृषस्थे सूर्ये कि कुर्यादित्याह-

**मेषोपगते सूर्ये ग्रीष्मजधान्यस्य संग्रहं कृत्वा।**

**वनमूलफलस्य वृषे चतुर्थमासे तयोर्लाभः।।३।।**

सूर्ये रवौ मेषोपगते मेषं प्राप्ते। अमावास्यायां पौर्णमास्यां चोत्पातानुक्तान दृष्ट्वा ग्रष्मजस्य ग्रीष्मोत्पन्नस्य धान्यस्य संग्रहं कृत्वा तथा वृषे वृषगतेऽर्के वनमूलफलस्य वन्यानां मूलफलानां संग्रहं कृत्वा तयोर्मेषवृषयोश्चतुर्थे मासि विक्रयाल्लाभो भवति।

अथ मिथुनस्य आह-

**मिथुनस्शे सर्वरमान् धान्यानि च संग्रहं समुपनीय।**

**षष्ठे मासे विपुलं विक्रेता प्राप्तुयाल्लाभम्।।४।।**

मिथुनस्थेऽर्के प्रागुक्तनुत्पातान् दृष्ट्वा। सर्वरसान् मधुरादीन्। धान्यानि च शालीन्। संग्रहं समुपनीय। संग्रहमेषां कृत्वा विक्रेता षष्ठे मासे विपुलं विस्तीर्णं लाभं प्राप्नुयाल्लभेत।

अथ कर्कटस्थ आह-

**कर्किण्यर्के- मधुगन्धतैलघृतकाणितानि विनिधाय।**

**द्विगुणा द्वितीयमासे लब्धिर्हीनाधिके छेदः॥५॥**

अर्के आदित्ये कर्किणि कर्कटस्थे मधु माक्षिकम्। गन्धः सुगन्धद्रव्याणि। तैलम्। घृतमाज्यम्। फाणितमिक्षुरसक्वाथः क्षुद्रगुडादि। एतानि विनिधाय संस्थाप्य द्वितीयमासे विक्रयादं द्विगुणा लब्धिर्भवति। हीने कालेऽधिके वा विक्रयाच्छेदो भवति।

अथ सिंहस्थ आह-

**सिंहे सुवर्णमणिचर्मवर्मशस्त्राणि मौक्तिकं रजतम्।**

**पञ्चममासे लब्धिर्विक्रेतुरतोऽन्यथा छेदः॥६॥**

सिंहस्थेऽर्के सुवर्णम्। मणयः। चर्माणि वर्म सन्नाहः। शस्त्राण्यायुधानि। मौक्तिकं मुक्ताफलानि। रजणं रौप्यम्। एतानि विनिधाय विक्रेतुः पञ्चमे मासे विक्रयाल्लब्धिर्भवति। अतोऽन्यथा ऊने कालेऽधिके वा छेदो भवति।

अथ कन्यागते रवावाह-

**कन्यागते दिनकरे चामरखरकरभवाजिनां क्रेता।**

**षष्ठे मासे द्विगुणं लाभमवाप्नोति विक्रीणन्॥७॥**

दिनकरे सूर्ये कन्यागते प्रागुक्तानुत्पातान् दृष्ट्वा चामरं बालव्यजनम्। खरो गर्दभः। करभ उष्ट्रः। वाजी तुरगः। एषां क्रेता षष्ठे मासे विक्रीणन् विक्रेता द्विगुणं लाभमाप्नोति लभते।

अथ तुलागत आह-

**तौलिनि तान्तवभाण्डं मणिकम्बलकाचपीतकुसुमानि।**

**आदद्याद्धान्यानि च वर्षार्द्धाद् द्विगुणिता वृद्धिः॥८॥**

तौलिनि तुलागणेऽर्के तान्तवभाण्डं तन्तुकृतं यत्किञ्चित् कर्म कर्पटादि मणयः। कम्बलम्। काचम्। पीतानि पीतवर्णानि कुसुमानि पुष्पानि। एतान्यादद्याद्ग्राहयेत्। धान्यानि च तथा। वर्षार्द्धात् षड्भिर्मासैर्द्विगुणिता वृद्धिर्द्विगुणत्वं व्रजन्ति। द्विगुणलाभो भवतीत्यर्थः।

अथ वृश्चिकस्थ आह-

**वृश्चिकसंस्थे सवितरि फलकन्दकमूलविविधरतनि।**

**वर्षद्वयमुषितानि द्विगुणं लाभं प्रयच्छन्ति॥९॥**

सवितरि आदित्ये वृश्चिकसंस्थे। फलानि। कन्दको मूलविशेषः। मूलानि अन्यानि द्रव्याणि। विविधानि नानाकाराणि रत्नानि। एतानि वर्षद्वयमुषितानि द्विगुणं लाभं प्रयच्छन्ति ददति।।

अथ धन्विस्थ आह

**चापगते गृह्णीयात् कुङ्कुमशङ्खप्रवालकाचानि।**

**मुक्ताफलानि च ततो वर्षार्द्धात् द्विगुणतां यान्ति।।१०।।**

चापगते धन्विस्थेऽर्के गृह्णीयात्। कुङ्कुम् काश्मीरम्। प्रवालं विद्रुमम्। काचम्। मुक्ताफलानि च। ततोऽनन्तरं क्रमात् परतः वर्षार्द्धात् षड्भिर्मासैर्द्विगुणतां यान्ति। द्विगुणं लाभं ददति।

अथ मकरकुम्भस्थेऽर्क आह-

**मृगघटसंस्थे सवितरि गृह्णीयाल्लोहभाण्डधान्यानि।**

**स्थित्वा मासं दद्याल्लाभार्थी द्विगणमाप्नोति।।११।।**

मृगो मकरः। घटः कुम्भः। सवितर्यादित्ये मृगघटसंस्थे लोहभाण्डधान्यानि गृह्णीयात् स्थापयेत्। लोहमयानि भाण्डानि धान्यानि च मासं स्थित्वा मासं संस्थाप्य ततो दद्याद्विक्रयं कुर्यात्। लाभार्थी द्विगुणं लाभमाप्नोति लभते।

अथ मीनस्थेऽर्क आह-

**सवितरि झषमुपयाते मूलफलं कन्दभाण्डरत्नानि।**

**संस्थाप्य वत्सरार्द्धं लाभकमिष्टं समाप्नोति।।१२।।**

सवितरि आदित्ये झषं मीनमुपयाते प्राप्ते। मूलानि। फलानि। कन्दो मूलविशेषः। भाण्डानि नानाकाराणि। रत्नानि मणयः। एतान् गृहीत्वा वत्सरार्द्धं मासषट्कं संस्थाप्येष्टं यथाभिलषितं लाभं वृद्धिं समाप्नोति लभते।

अत्रैव पुनरपि विशेषमाह-

**राशौ राशौ यस्मिन् शिशिरमयूखः सहस्त्रकिरणो वा।**

**युक्तोऽधिमित्रदृष्टस्तत्रायं लाभको दिष्टः।।१३।।**

यस्मिन् राशौ राशौ मेषादिके शिशिरमयूखश्चन्द्रः सहस्त्रकिरणो वा सूर्यः। अधिमित्रेण तात्कालिकेन दृष्टो विलोकितो मित्रयुक्तश्च भवति। यतस्तत्कालं दशायबन्दुसहजस्वान्तेषु

स्थितो ग्रहो मित्रं भवति। तद्यूक्तत्वात्तेन मित्रयुक्तोऽधिमित्रदृष्टः। तत्र तस्मिन् राशौ अयं लाभको दिष्टोऽभिहितो नान्यत्र योगसम्भवात्। यतोऽमावास्यापौर्णमास्योरयं विचारः। उत्पादर्शनात्। अतः शिशिरमयूखसहस्त्रकिरणग्रहणं कृतम्। तथा च काश्यपः- **बृ.सं.,पृ-४७४**

अत्रैव विशेषमाह-

**सवितृसहितः सम्पूर्णो वा शुभैर्युतवीक्षितः**

**शिशिरकिरणः सद्योऽर्धस्य प्रवृद्धिकरः स्मृतः।**

**अशुभसहितः सन्दृष्टो वा हिनस्त्यथवा रविः**

**प्रतिगृहगतान् भावान् बुद्ध्वा वदेत् सदसत्फलम्।।१४।।**

शिशिरकिरणश्चन्द्रः सवितृसहितः सूर्येण सहावस्थितोऽमावास्यायां शुभग्रहैर्बुधजीवशुक्रैर्यूतः संयुतो वीक्षितो यत्र राशौ भवति तत्र सद्योऽर्धस्य सुवृद्धिकरः स्मृतः।

अथाशुभसहितः पापग्रहाभ्यां भौमसौराभ्यां युक्तः सन्दृष्टो रविर्वा चन्द्रो हिनस्ति नाशयति। अर्घहानिं करोतीत्यर्थः। एवं प्रतिगृहगतान् प्रतिराशिव्यवस्थितान् भावान् द्रव्याण्यु-क्तान् बुद्ध्वा ज्ञात्वा सदसच्छुभमशुभं वा फलं वदेद् ब्रूयादिति। काश्यपः- **बृ.सं.,पृ-४७५**

## ४. इन्द्रध्वजसम्पदाध्यायः

अथेन्द्रध्वजसम्पद्व्याख्यायते। तत्रादावेव तदुत्पत्तिप्रदर्शनार्थमाह-

**ब्रह्माणमूचुरमरा भगवन् शक्ताः स्म नासुरान् समरे।**

**प्रतियोघयितुमतस्त्वां शरण्यशरणं समुपयाताः।।१।।**

अमरा देवा ब्रह्माणमूचुः पितामहयमुक्तवन्तः। किं तदित्याह- हे भगवन् पितामह ! वयमसुरान् देत्यान् समरे संग्रामे प्रतियोधयितुं तैः सह युद्धं कर्त्तुं न शक्ताः स्मः। अतोऽस्माद्धेतोः शरण्यं त्वां शरणं वयं समुपयाताः प्राप्ता इति।

ततोऽनन्तरं स तानाह-

**देवानुवाच भगवान् क्षीरोदे केशवः स वः केतुम्।**

**यं दास्यति तं द्दष्टा नाजौ स्थास्यन्ति वो दैत्याः।।२।।**

भगवान् ब्रह्मा देवानुवाच प्रोक्तवान्। क्षीरोदे क्षीरसमुद्रे यः केशवो नारायणः स वो युष्मभ्यं यं केतुं ध्वजं दास्यति तं दृष्ट्वा अवलोक्य वो युष्माकमाजौ संग्रामे दैत्या न स्थास्यन्ति।

ततः किमित्याह श्लोकत्रयेण-

**लब्धवराः क्षीरोदं गत्वा ते तुष्टुवुः सुराः सेन्द्राः।**

**श्रीवत्साङ्कं कौस्तुभमणिकिरणोद्भासितोरस्कम्।।३।।**

**श्रीपतिमचिन्त्यमसमं समं ततः सर्वदेहिनां सूक्ष्मम्।**

**परमात्मानमनादिं विष्णुमविज्ञातपर्यन्तम्।।४।।**

**तैः संस्तुतः स देवस्तुतोष नारायणो ददौ चैषाम्।**

**ध्वजमसुरसुरवधूमुखकमलवनतुषारतीक्ष्णांशुभ्।।५।।**

ते सेन्द्रा इन्द्रसहिताः सुरा देवा लब्धो वरो यैस्ते लब्धवराः क्षीरोदं क्षीरसमुद्रं गत्वा तं भगवन्तं केशवं तुष्टुवः स्तुतवन्तः। श्रीवत्साङ्कं श्रीवत्समङ्कं चिह्नं यस्य तम्। कौस्तुभो मणिविशेषस्तस्य किरणा रश्मतयस्तैरुद्भासितमुरो वक्षो यस्य तम्।

तथाभूतं श्रीपतिं लक्ष्मीनाथम्। अचिन्त्यम्। चिन्तयितुं न शक्यम्। असमम्। असदृशम्। अनौपम्यमित्यर्थः। समं सर्वगतत्वात्तुल्यम्। ततः समत्वात् सर्वदेहिनां सर्व-भूतानां सूक्ष्मं

दुर्विज्ञेयम्। परमात्मानम्। परमाश्चासौ आत्मा परमात्मा तं तथाभूतम्। अनादिम्। न आदिरुत्पत्तिर्विद्यते यस्य तम्। विष्णुम्। व्यापकम्। अविज्ञातपर्यन्तम्। न विज्ञातः पर्यन्तः सर्गो यस्य तम्। अविज्ञातनिधनमित्यर्थः।

तैः सेन्द्रैर्देवः संस्तुतः स देवो नारायणस्तुतोष। तुष्टश्चैषां देवानां ध्वजं ददौ। कीदृशं ध्वजम्? असुरसुरवधूमुखकमलवनतुषारतीक्ष्णांशुम्, असुरा दैत्याः सुरा देवास्तेषां वध्वः स्त्रियस्तासां मुखकमलानि वक्त्रपद्मानि तदेव मुखकमलानां वनं समूहस्तत्र तीक्ष्णांशुः सूर्यः। विकाशकत्वात्। त्रिभिर्विशेषकम्।

कीदृशं ध्वजं ददावित्याह-

**तं विष्णुतेजोद्भवमष्टचक्रे रथे स्थितं भास्वति रत्नचित्रे।**

**देदीप्यमानं शरदीव सूर्य ध्वजं समासाद्य मुमोद शक्रः।।६।।**

तं ध्वजं विष्णुतेजोभवम्। विष्णुतेजसोद्भव उत्पत्तिर्यस्य तम्। अष्टचक्रे रथे स्थितम्। अष्टभिश्चक्रैर्यो युक्तो रथः स्यन्दनं तत्र स्थितम्। कीदृशे भास्वति। तेजोयुते। रत्नचित्रे मणिभूषिते। कीदृशं ध्वजम्। देदीप्यमानं शरदीव सूर्यम्। शरदि शरत्काले सूर्यमादित्यमिव देदीप्यमानं ज्वलन्तम्। एवंविधं तं ध्वजं शक्र इन्द्रः समासाद्य प्रापय मुमोद जहृषे।।

ततस्तं प्राप्य किं कृतवानिन्द्र इत्याह-

**स किङ्किणीजालपरिष्कृतेन स्त्रक्छत्रघण्टापिटकान्वितेन।**

**समुच्छ्रितेनामरराड्ध्वजेन निन्ये विनाशं समरेऽरिसैन्यम्।।७।।**

अमरराडिन्द्रस्तेन ध्वजेन समुच्छ्रितेनारिसैन्यं शत्रुसैन्यं समरे संग्रामे विनाशं क्षयं निन्ये। कीदृशेन? किङ्किणीजालपरिष्कृतेन। किङ्किण्यः सूक्ष्मघण्टाः। तासां जालं समूहः। तेन परिष्कृतेन युक्तेन। स्त्रक्छत्रघण्टापिकान्तिवेन्, स्त्रक् माला। छत्रमातपत्रम्। घण्टा प्रसिद्धा। पिटकानि विभूषणानि। तैरन्वितेन युक्तेन। तथा च गर्गः- **बृ.सं.,पृ-४७८**

ततस्तं ध्वजमिन्द्रो वसुं ददावित्याह-

**उपरिचरस्यामरपो वसोर्ददौ चेदिपस्य वेणुमयीम्।**

**यष्टिं तां स नरेन्द्रो विधिवत् सम्पूजयामास।।८।।**

ततोऽमरप इन्द्र उपरिचरस्योर्ध्वगामिनो वसुनामचेदिपस्य वेणुमयीं यष्टिं ददौ। चेदिनां जनपदानां राजा वसुपो भूमिष्ठः सन् उपरि चरति स्वर्ग याति। तथा स नरेन्द्रश्चैदिपो विधिवतां यष्टिं सम्पूजयामास पूजितवान्।

अथ शक्रप्रसादं ध्वजमहात्म्यं श्लोकद्वयेनाह-

**प्रीतो महेन मघवा प्राहैवं ये नृपाः करिष्यन्ति।**

**वसुवद्वसुमन्तस्ते भुवि सिद्धाज्ञा भविष्यन्ति।।९।।**

**मुदिताः प्रजाश्च तेषां भयरोगविवर्जिताः प्रभूतान्नाः।**

**ध्वज एव चाभिधास्यति जगति निमित्तैः फलं सदसत्।।१०।।**

मघवा भगवानिन्द्रो महेन पूजया प्रीतः परितुष्टः प्राह उक्तवान्। एवमनेन प्रकारेण वसुवद्वसुना तुल्यं ये नृपा राजानः करिष्यन्ति ते वसुमन्तः। वसूनि रत्नानि विद्यन्ते येषाम्। तथा भुवि भूमौ सिद्धाज्ञा भविष्यन्ति। सिद्धा आज्ञा येषां ते विहितादेशाः कृतादेशा इत्यर्थः।

मुदिता इति। तेषां नृपाणां प्रजा जना मुदिता भविष्यन्ति तथा भयरोगैर्विवर्जिता रहिताः। प्रभूतान्नाः। प्रभूतं बह्वन्नं येषां ते। ततो ध्वज एव जगति लोके निमित्तैः कारणैः सदसच्छुभाशुभं फलं दास्यति। एतदुक्तं भवति – य एवं भगवता दत्तं ध्वजं राजा पूजयिष्यति। स एव ध्वजः पूज्यमानाो लोके निमित्तौश्चिह्नैः शुभाशुभं दास्यतीत्यर्थः। युगलकम्।

अथास्य विधानं वक्ष्यामीत्याह-

**पूजा तस्य नरेन्द्रैर्बलवृद्धिजयार्थिभिर्यथा पूर्वम्।**

**शक्राज्ञया प्रयुक्ता तामागमतः प्रवक्ष्यामि।।११।।**

तस्य ध्वजस्य नरेन्द्रौ राजभिर्बलवृद्धिजयार्थिभिः। बलवृद्धिजयानां येऽर्थिनः प्रार्थना-परास्तैर्यथा येन प्रकारेण पूर्वं पुरा शक्राज्ञया इन्द्राज्ञया प्रयुक्ता कृता तां पूजामागमत आगमात् प्रवक्ष्यामि। यथावदभिधास्यामीत्यर्थः।।

अथ तदभिधानमेवाह-

**तस्य विधानं शुभकरणदिवसनक्षत्रमङ्गलमुहूर्तैः।**

**तस्य विधानं शुभकरणदिवसनक्षत्रमङ्गलमुहूर्तैः।**

**प्रास्थानिकैर्वनमियाद्दैवज्ञः सूत्रधारश्च।।१२।।**

तस्येन्द्रध्वजस्य विधानं करणमं। शुभे शुभप्रदे करणे। करणानि बवादीना। तस्मिन् शुभे विष्टिपरिवर्जिते। आचार्योऽत्र लक्षणं कथियिष्यति। यथा-

एवंविधे शुभे करणे। दिवसशब्देन तिथिर्वा वार उच्यते -

नन्दा भद्रा रिक्ता पूर्णा च नामसदृशफलाः।।इति।।

तत्र वने किं कुर्यादित्यशुभतरुच्छदवर्जं श्लोकद्वयेनाऽऽह-

**उद्यानदेवतालयपितृवनवल्मीकमार्गचितिजाताः।**

**कुब्जोर्ध्वशुष्ककण्टकिवल्लीवन्दाकयुक्ताश्च।।१३।।**

**बहुविहगालयकोटरपवनानलपीडिताश्च ये तरवः।**

**ये च स्तुः स्त्रीसञ्ज्ञा न ते शुभाः शक्रकेत्वर्थे।।१४।।**

**श्रेष्ठोऽर्जुनोऽजकर्णः प्रियकघवोदुम्बराश्च पञ्चैते।**

**एतेषामेकतमं प्रशस्तमथवापरं वृक्षम्।।१५।।**

अर्जुनो वृक्षः श्रेष्ठः प्रशस्तः। अजकर्णः। प्रियकः। धवः। उदुम्बरः। एते पञ्च श्रेष्ठाः। एतेषां मध्यादेकतममन्यतमम्। अथवाऽपरमन्यं वृक्षं प्रशस्तं शुभलक्षणमित्यर्थः।

तत्कीदृशमित्याह-

**गौरासितक्षितिभवं सम्पूज्य यथाविधि द्विजः पूर्वम्।**

**विजन समेत्य रात्रौ स्पृष्टा शुणुयादिमं मन्त्रम्।।१६।।**

गौरायामसितायां च क्षितौ भूमौ भव उत्पत्तिर्यस्य तं तथाभूतं वृक्षं द्विजो ब्राह्मणः पूर्वं स्प्रथमसमये रात्रौ निशि विजने जनरहिते समेत्य गत्वा यथाविधि सम्पूज्य समभ्यर्च्य स्पृष्ट्वा च मन्त्रमिमं ब्रूयाद्वदेत्।।१६।।

तमेव मन्त्रं श्लोकद्वयेनाह-

**यानीह वृक्षे भूतानि तेभ्यः स्वस्ति नमोऽस्तु वः।**

**उपहारं गृहीत्वेमं क्रियतां वासपर्ययः।।१७।।**

**पार्थिवस्त्वां वरयते स्वस्ति तेऽस्तु नगोत्तम।**

**ध्वजार्थं देवराजस्य पूजेयं प्रतिगृह्यताम्।।१८।।**

**छिन्द्यात्प्रभातसमये वृक्षमृक्प्राङ्मुखोऽपि वा भूत्वा।**

**परशोर्जर्जरशब्दो नेष्टः स्निग्धो घनश्च हितः।।१९।।**

ततः प्रभातसमये अरुणोदयकाले वृक्षं तरुं छिन्द्यात्। कीदृशो भूत्वा? उदक् प्राङ्-मुखोऽपि वा भूत्वा, उत्तराभिमुखः पूर्वाभिमुखोऽपि वा स्थित्वा। परशोः कुठारस्य जर्जरशब्दो भिन्नशब्दो नेष्टो न शुभः। स्निग्धो मधुरः, घनः सन्ततश्च हितः प्रशस्तः।।

अथ पतितस्य शुभाशुभज्ञानमाह-

**नृपजयदमविध्वस्तं पतनमनाकृञ्चितं च पूर्वोदक्।**

**अविलग्नं चान्यतरौ विपरीतमस्त्यजेत्पतितम्।।२०।।**

**छित्त्वाग्रे चतुरङ्गुलमष्टौ मूले जले क्षिपेष्टिम्।**

**उद्धृत्य पुरद्वारं शकटेन नयेन्मनुष्यैर्वा।।२१।।**

**अरभङ्गे बलभेदो नेम्या नाशो बलस्य विज्ञेयः**

**अर्धक्षपोऽक्षमङ्गे तथाणिभङ्गे च वर्द्धकिनः।।२२।।**

अरं चक्रस्य मध्यवर्ति काष्ठम्। तस्य भङ्गे बलस्य सैन्यस्य भेदो भवति। नेमिश्चक्र पर्यन्तम्। तस्या भङ्गे बलस्य नाशः क्षयो भवति। अक्षश्चक्रविवरवर्ति काष्ठम्। तस्य भङ्गेऽर्थक्षयो द्रव्यविनाशः। अणिरक्षाग्रे कीलकः। तस्य भङ्गे वर्द्धकिनस्तक्ष्णः क्षयः।।

अथ कस्मिन् काले प्रवेशयेदित्याह श्लोकद्वयेन -

**भाद्रपदशुक्लपक्षस्याष्टम्यां नागरैर्वृतो राजा।**

**दैवज्ञसचिवकञ्चुकिविप्रप्रमुखैः सुवेषधरैः।।२३।।**

**अहताम्बरसंवीतां यष्टिं पौरन्दरीं पुरं पौरैः।**

**स्त्रग्गन्धधूपयुक्तां प्रवेशपेच्छङ्खतूर्यरवैः।।२४।।**

भाद्रपदशुक्लाष्टम्यां तिथौ राजा नृपो नागरैर्नगरवासिभिर्जनैर्वृतः परिवृतस्तथा दैवज्ञेन सांवत्सरिकेण। सचिवैर्मन्त्रिभिः। कञ्चुकिभिर्महत्तरकैर्विप्रमुखैर्ब्राह्मणप्रवरैः सुवेषधरैः।

पौरैः स पौरन्दरीमैन्द्रीं यष्टिं प्रवेशयेत् पुरं नगरम्। कीदृशीं यष्टिम्? अहताम्बरसंवीताम्, अहतमक्षतमभिनवमम्बरं वस्त्रं तेन संवीतामावृताम्। तथा स्त्रग्गन्धधूपयुक्ताम्। स्त्रग्भिर्मालाभिः, युगलकम्। तथा च गर्गः- **बृ.सं.,पृ-४८३**

कीदृशं नगरमित्याह श्लोकद्वयेन-

**रुचिरपताकातोरणवनमालालङ्कृतं प्रहृष्टजनम्।**

**संमार्जिताचितपथं सुवेषगणिकाजनाकीर्णम्।।२५।।**

**अभ्यर्चितापणगृहं प्रभूतपुण्याहवेदनिघोषम्।**

**नटनर्तकगेयज्ञैराकीर्णचतुष्पथं नगरम्।।२६।।**

**तत्र पताकाः श्वेता भवन्ति विजयाय रोगदाः पीताः।**

**जयदाश्च त्रिरूपा रक्ताः शस्त्रप्रकोपायः।।२७।।**

तत्र तस्मिन्नगरे पताकाः श्वेताः शुक्लवर्णा विजयाय भवन्ति। पीताः पीतवर्णां रोगदा भवन्ति। चित्ररूपा नानावर्णा जयदा एव। शत्रुविजयं कुर्वन्तीत्यर्थः। रक्ता रक्तवर्णाः पताकाः शस्त्रप्रकोपाय भवन्ति।।

तस्यां प्रवेशमानायां शुभाशुभमाह-

**यष्टिं प्रवेशयन्तीं निपातयन्तो भयाप नागाद्याः।**

**बालानां तलशब्दे सङ्ग्रामः सत्त्वयुद्धे वा।।२८।।**

प्रवेशयन्ती यष्टिं नागाद्याः। नागा हस्तिनंः। आदिग्रहणादश्वमहिषगवादयो गृह्यन्ते। एते निपातयन्तो भयाय भवन्ति। तथा बालानां शिशूनाम्। तलशब्देन हस्ततलमुच्यते। तेन करास्फोटेन संग्रामो भवति। सत्त्वानां गवां युद्धे संग्राम एव भवति।।

ततः किं कुर्यादित्याह श्लोकद्वयेन -

**सन्तक्ष्य पुनस्तक्षा विधिवद्यष्टिं प्ररोपयेद्यन्त्रे।**

**जागरमेकादश्यां नरेश्वरः कारयेचास्याम्।।२९।।**

**सितवस्त्रोष्णीषधरः पुरोहितः शाक्रवैष्णवैर्मन्त्रैः।**

**जुहयादग्नि सांवत्सरो निमित्तानि गृह्णीयात्।।३०।।**

तां यष्टिं पुनर्भूयस्तक्ष वर्द्धकी सन्तक्ष्य तनूकृत्य विधिवद्विधानेन यन्त्रे प्ररोपयेत्। आसनस्थाने निवेश्य तिर्यक् स्थितां कुत्रचित् सक्तां स्थापयेत्। तथास्थितायामेकादश्यां नरेश्वरो राजा रात्रिजागरं कारयेत्।

तस्य च राज्ञः पुरोहितं आचार्यः शाक्रवैष्णवैरिन्द्रदैवतैर्विष्णुदैवतैश्च मन्त्रैरग्निमनलं जुहुयात्। कीदृशःपुरोहितः? सितवस्त्रोष्णीषधरः, सितानि श्वेतानि वस्त्राणि अम्बराणि, तथोष्णीषं शिरः पट्टविशेषं यो धारयति। सांवत्सरो ज्यौतिषिकः। अग्नेर्निमित्तानि शुभा शुभानि चिह्नानि गृह्णीयात्। युगलकम्।।

अथ शुभाशुभानि चिह्नान्याह-

**इष्टद्रव्याकारः सुरभिः स्निग्धो घनोऽनलोऽचिष्मान्।**

**शुभकृदतोऽन्योऽनिष्टो यात्रायां विस्तरोऽभिहितः।।३१।।**

**स्वाहावसानसमये स्वयमुज्जलार्चिः स्निग्धः प्रदक्षिणशिखो हुतभुङ नृपस्य।**

**गङ्गादिवाकरसुताजलचारुहारां घात्रीं समुद्ररशनां वशगां करोति।।३२।।**

एवंरूपो हुतभुगग्निर्नृपस्य राज्ञः समुद्ररशनां समुद्रमेखलां धात्रीं भूमिं वशगां करोति। कीदृशीं धात्रीम्? गङ्गादिवाकरसुताजलचारुहाराम् गङ्गा जाह्नवी, दिवाकरसुता यमुना, तयोर्यज्जलं सलिलं तदेव चारुदर्शनीयो हारो यस्यास्ताम्। कीदृशोऽग्निः? स्वाहावसानसमये पूर्णाहुतिदान-काले स्वयमेवाज्ज्वलार्चिः, स्वयमेवोऽर्चिर्यस्याग्नेः। स्निग्धो निर्मलः। प्रदक्षिणशिखः, प्रादक्षिण्येन शिखा ज्वाला यस्येत्यर्थः।।

अन्यदाह-

**चामीकराशोककुरण्टकाब्जवैदूर्यनीलोत्पलसन्निभेऽग्नौ।**

**न ध्वान्तमन्तर्भवनेऽवकाशं करोति रत्नांशुहतं नृपस्य।।३३।।**

एवंविधेऽग्नौ नृपस्य राज्ञो ध्वान्तमन्धकारम्। अन्तर्भवने गृहमध्ये अवकाशं न करोति। यतो रत्नाशुहमत् , रत्नानामंशवो रत्नांशवस्तैर्हतं नष्टं रत्नांशुहतम्। रत्नांशुहतमित्यनेन रत्नलाभ उक्तः। कीदृशेऽग्नौ? चामीकरं सुवर्णम्, अशोकः पुष्पविशेषः, कुरण्टकश्च, अब्जं पद्मम् वैदूर्या रत्नविशेषः, नीलोत्पलमिन्दीवरम्, एषां सन्निभे अग्नौ शुभः प्रत्यासन्नो भवति।

अन्यदपि लक्षणमाह-

**येषां रथौघार्णवमेघदन्तिनां समस्वनोऽग्निर्यदि वापि दुन्दुभेः।**

**तेषां मदान्धेभघटावघट्टिता भवन्ति याने तिमिरोपमा दिशः।।३४।।**

येषां राज्ञां रथौधघो गोरथसमूहः। अर्णवः समुद्रः। मेघोऽम्बुदः। दन्ती हस्ती। एषां समस्वनस्तुल्यशब्दोऽग्निर्यदि। वापि दुन्दुभेः, दुन्दुभिर्वाद्यविशेषः तत्समानो वा। तेषां राज्ञां मदान्धा ये इभा हस्तिनः। तेषां या घटास्ताभिरवघट्टिता रुद्धा दिशो याने गमने तिमिरोपमां अन्धकारसदृश्यो भवन्ति। तिमिरोपमा दिश इत्यनेन हस्तिबाहुल्यमुक्तम्।।

अन्यदपि वह्निलक्षणमाह-

**ध्वजकुम्भहयेभभूभृतामनुरुपे वशमेति भूभृताम्।**

**उदयास्तधराधराऽधरा हिमवद्विन्ध्यपयोधरा धरा।।३५।।**

ध्वजश्चिह्नं पताकादि। कुम्भो घटः। हयोऽश्वः। इभो हस्ती। भूभृत् पर्वतः। एषामनुरूपे सदृशेऽग्नौ भूभृतां राज्ञां धरा भूर्वशमेति। कीदृशी धरा? उदयधराधरः अस्तमयधराधर उदया-स्तधराधरौ तावेवाधरावोष्ठौ यस्याः। हिमवद्विन्ध्यौ पयोधरौ स्तनौ यस्याः।।

अथान्यदपि वह्निलक्षणमाह-

**द्विरदमदमहीसरोजलाजाघृतमधुना च हुताशने सगन्धे।**

**प्रणतनृपशिरोमणिप्रभाभिर्भवति पुरश्छुरितेव भूर्नृपस्य।।३६।।**

**उक्तं यदुत्तिष्ठति शक्रकेतौ शुभाशुभं सप्तमरीचिरुपैः।**

**तज्जन्मयज्ञग्रहशान्तियात्राविवाहकालेष्वपि चिन्तनीयम्।।३७।।**

शक्रकेताविन्द्रध्वजे उत्तिष्ठति सति यच्छुभाशुभं सदसत्फलं सप्तमरीचिरूपैः, सप्तमरी-चिरग्निस्तस्य रूपैर्यदुक्तं यत्कथितं तत्सर्वं जन्मसयमे। यज्ञे यज्ञकाले, ग्रहशान्तौ, यात्रायाम्, विवाहकाले च। एवमादिष्वपि चिन्तनीयम्।।

तत्किं कुर्यादित्याह-

**गुडापूपपायसाद्यैर्विप्रानभ्यर्च्य दक्षिणाभिश्च।**

**श्रवणेन द्वादश्याश्रुत्थाप्योऽन्त्रय वा श्रवणान्।।३८।।**

गुड इक्षुविकारः। पूपो मुद्गकृतो मिश्रितो वा तण्डुलेन सह। पायसं प्रसिद्धम्। आदिग्रह-णादोदनमोदकलोपिकाश्च गृह्यन्ते। एतैर्विप्रान् ब्राह्मणानभ्यर्च्य सम्पूज्य। न केवलं गुडापूप-पायसाद्यैः, दक्षिणाभिश्च पूजयित्वा द्वादश्यां श्रवणेन नक्षत्रेणोत्थाप्य उत्थापनीयः। श्रवणादन्यत्र वा द्वादश्यामुत्थापनीयः। एतदुक्तं भवति - द्वादश्यां श्रवणो भवतु मा वा सर्वत्रोत्थापनं कार्यम्। तथा च गर्गः- **बृ.सं.,पृ-४८८**

अधुना शक्रकुमारीणां लक्षणं श्लोकद्वयेनाह-

**शक्रकुमार्यः कार्याः प्राह मनुः पप्त सञ्च वा तज्ज्ञैः।**

**नन्दोपनन्दसञ्ज्ञे पादोनार्द्धध्वजोच्छ्रायात्।।३९।।**

**षोडशभागाम्यधिके जयविजये द्वे वसुन्धरे चान्ये।**

**अधिका शक्रजनित्री मध्येऽष्टांशेन चैतासाम्।।४०।।**

मनुरेवं प्राह, एवमुक्तवान्। यथा तज्ज्ञैः शक्रध्वजलक्षणज्ञैः सप्त पञ्च वा शक्रकुमार्यः कार्याः। तथा च गर्गः- **बृ.सं.,पृ-४८८**

नन्दोपनन्दसंज्ञे इति। नन्दोपनन्दासंज्ञे द्वे ध्वजोच्छ्रायाद्यथासङ्ख्यं पादोनार्द्धे कार्ये। नन्दा ध्वजप्रमाणचतुर्भागोना कार्या। उपनन्दा ध्वजार्द्धप्रमाणेनेति।

अत्राचार्येणेन्द्रध्वजप्रमाणं सामान्येनोक्तम्। गर्गादिभिर्विशेषेणोक्तम्। तथा च गर्गः-

षोडशभागेति। नन्दोपन्दसंज्ञाभ्यां यथाक्रमं जयविजये द्वे षोडशभागाधिके कार्ये। जयविजयाभ्यां सकाशात् षोडशभागाभ्यधिके अन्ये वसुन्धरासंज्ञे ध्वजे कार्ये। एतासां सर्वासां मध्ये शक्रजनित्री इन्द्रमाताऽष्टांशेनाष्टांशाधिका वसुन्धरातः कार्येति। युगलकम्।।

अथान्यदपि शक्रकेतुलक्षणमाह-

**प्रीतैः कृतानि विबुधैर्यानि पुरा भूषणानि सुरकेतोः।**

**तानि क्रमेण दद्यात् पिटकानि विचित्ररूपाणि।।४१।।**

पुरा पूर्वं सुरकेतोरिन्द्रध्वजस्य प्रीतैः प्रीतिमद्भिर्विबुधैर्देवैर्यानि भूषणानि अलङ्करणानि कृतानि तानि च क्रमेण पारिपाटया विचित्ररूपाणि पिटकानि दद्यात्।।

तानि सर्वाण्याहाष्टभिः श्लोकैः-

**रक्ताशोकनिकाशं चतुरस्त्रं विश्वकर्मणा प्रथमम्।**

**रशना स्वयम्भुवा शङ्करेण चानेकवर्णगा दत्ता।।४२,४३,४४,।।**

**वैदूर्यसद्दशमिन्द्रो नवमं ग्रैवेयकं ददावन्यत्।**

**रथचक्राभं दशमं सूर्यस्त्वष्टा प्रभायुक्तम्।।४५, ४६।।**

**यद्यद्येन विभूषणममरेण विनिर्मितं ध्वजस्यार्थे।**

**तत्तत्तद्दैवत्यं विज्ञातव्यं विपश्चिद्भिः।।४८,४८, ४९।।**

**ध्वजपरिमाणत्र्यंशः परिधिः प्रथमस्य भवति पिटकस्य।**

**परतः प्रथमात् प्रथमादष्टांशाष्टांशहीनानि।।५०।।**

ध्वजस्येन्द्रध्वजस्य यत्परिमाणमुक्तं तस्माद्यस्तृतीयोंऽशस्तृतीयो भागस्तावत्सूक्ष्मं प्रथमस्य पिटकस्य परिधिर्भवति। ततः प्रथमात् पिटकात्परतोऽन्यानि यानि द्वादशापिटकानि तानि सर्वाण्यष्टांशहीनानि कार्याणि। एतदुक्तं भवति - प्रथमात् पिटकाद् द्वितीयस्याष्टांशहीनः परिधिः कार्यः। द्वितीयातृतीय-स्याष्टांशोन इत्यनेन क्रमेण यावत्त्रयोदशं पिटकम्।।

कस्मिन् दिने पिटकैः पूरणं कार्यमित्याह-

**कुर्यादहनि चतुर्थे पूरणमिन्द्रध्वजस्य शास्त्रज्ञः।**

**मनुना चागमगीतान् मन्त्रानेतान् पठेन्नियतः।।५१।।**

शास्त्रज्ञ इन्द्रध्वजलक्षणवित् चतुर्थेऽहनि पञ्चदशामिन्द्रध्वजस्य पिटकैः पूरणं भरणं कुर्यात्। कीदृशः? नियतः प्रह्वः। एतान् मन्त्रान् वक्ष्यमाणान् पठेत् कीर्तयेत्। कीदृशान्? मनुना नृपेण चागमगीतान् , आगमादुक्तान्।।

तानाह श्लोकचतुष्टयेन -

**हरार्कवैवस्वतशक्रसोमैर्धनेशवैश्वानरपाशभृद्भिः।**

**महर्षिसङ्घैः सदिगप्सरोभिः शुक्राङ्गिरःस्कन्दमरुन्दणैश्च।।५२,५३।।**

**कविं सप्तजिह्वं त्रातारमिन्द्रं स्ववितारं सुरेशम्।**

**ह्वयामि शक्रं वृत्रहणं सुषेणमस्माकं वीरा उत्तरा भवन्तु।।५४, ५५।।**

हरो महदेवः। अर्क आदित्यः। वैवस्वतो यमः। शक्र इन्द्रः। सोमश्चन्द्रः। तथा धनेशो वैश्रवणः। वैश्वानरोऽग्निः। पाशभृद्वरुणः। एतैः सुरैर्महर्षिसङ्घैर्महर्षीणा। वृन्दैरतैः किम्भूतैः। सदिगप्सरोभिर्दिग्भि-राशाभिः अप्सरोभिः सहितैः। तथा शुक्रो भार्गवः। अङ्गिरा बृहस्पतिः। स्कन्दः कुमारः। मरुद्गणो मरुतां सङ्घः। एतैः सर्वैस्त्वम्।

यथा येन प्रकारेण उदारैः श्रेष्ठैराभरणैः। ऊर्जस्करणैकरूपैः समर्चितः पूजितः। तथा तेनैव प्रकारेणेहास्मिन् यागे शुभानि तान्येवाभरणानि सम्प्रीतमनास्तुष्टचित्तो गृहाण।

अजोऽव्यय इति। त्वमो नाजायत इति अजः। अव्ययो न व्ययं याति। अक्षय इत्यर्थः। शाश्वतः सार्वदिकः। एकरूपो बहुरूपरहितः। विष्णुर्व्यापकः। वराहो वराहरूपः। पुरुषः प्रधानाख्यः। पुराणश्चिरन्तनः। एवंविधस्त्वम्। तथा अन्तको यमः। सर्वहरः सर्वसंहारकः। कृशानुरग्निः। सहस्त्रशीर्षः सहस्त्रवक्त्रः। शतमन्युरिन्द्रः। ईड्यः स्तुत्यः।

कविं विद्वांसम्। सप्तहिह्वमग्निम्। त्रातारं पालयितारम्। इन्द्रं परमैश्वर्ययुक्तम्। स्ववितारं सुष्ठुरक्षितारम्। सुरेश देवप्रभुम्। ह्वयामि आह्वयामि। शक्रमिन्द्रं वृत्रहणं वृत्रस्य हन्तारम्। सुषेणं शोभना सेना यस्य। तमस्माकं नः। वीरा बलिनः। उत्तरा भवन्तु। जयिनो भवन्त्वित्यर्थः। कलापम्।

कस्मिन् काले एतान्मन्त्रान् पठेदित्याह-

**प्रपूरणे चोच्छ्रयणे प्रवेशे स्नाने तथा माल्यविधौ विसर्गे।**

**पठेदिमान्नृपतिः सोपवासो मन्त्रान् शुभान् पुरुहूतस्य केतो ः।।५६।।**

प्रपूरणे पिटकाभरणे। उच्छ्रयणे उत्थापने। प्रवेशे नगरप्रवेशे। स्नाने स्नानकाले तथा माल्यविधौ पुष्पप्रदानकाले। विसर्गे विसर्जने। एतेषु कार्येषु नृपती राजा सोपवास उपोषितः। पुरुहूतस्य केतोरिन्द्रध्वस्येमानुक्तन् शुभान् मन्त्रान् पठेत् कीर्तयेत्।।

कीदृशमिन्द्रध्वजमुत्थापयेदित्याह श्लोकद्वयेन -

**छत्रध्वजादर्शफलार्द्धचन्द्रैविचित्रमालाकदलोक्षुदण्डैः।**

**सव्यालसिंहैः पिटकैर्गवाक्षैरलङ्कृतं दिक्षु व लोकपालैः।।५७।।**

**अच्छिन्नरज्जुं द्दढकाष्ठमातृकं सुश्लिष्टयन्त्रार्गलपादतोरणम्।**

**उत्थापथेल्लक्ष्म सहस्त्रचक्षुपः सारद्रुमाभग्रकुमारिकान्वितम्।।५८।।**

एवंविधं सहस्त्रवृक्षुषो दशशतनयनस्येन्द्रस्य लक्ष्म ध्वजमुत्थापयेत्। कीदृशं छत्रमातपत्रम्। ध्वजः पताका। आदर्शो दर्पणम्। फलं लाङ्गलम्। अर्द्धचन्द्रः खण्डेन्दुः विचित्रमाला नानाविधाः स्त्रजः। तथा कदली वृक्षविशेषः। इक्षुदण्डः। एतैः सह। तथा दिक्ष्वष्टासुलोकपालैरन्द्रिाग्नियम-नैर्ऋतवरुणवायुकुवेरे-शानैरलंकृतं संयुक्तम्।

तथा अच्छिन्नरज्जुम् अच्छिन्ना रज्जवो यस्य। इन्द्रध्वजबन्धनार्थमष्टासु दिक्षु अष्टौ रज्जवः कार्याः। तथा च गर्गः- **बृ.सं.,पृ-४९३**

दृढकाष्टमातृकम् , दृढकाष्ठा मातृका यस्य। इन्द्रध्वजनिष्पीडनार्थं पार्श्वद्वये मातृकाद्वितयं कार्यम्। सुश्लिष्टयन्त्रार्गलपादतोरणम्, सुश्लिष्टं यन्त्रार्गलं पादमूले तोरणं यस्य। अयमर्थःपादमूलध्वस्य तोरणं कार्य तत्र या मातृकाः पार्श्वस्थितानि निरन्तराणि काष्ठानि तासां मातृकाणां तिर्यक्कृत्वा यानि काष्ठानि निक्षिप्यन्ते तान्यर्गलाग्रहणेनोच्यन्ते। ता अर्गलाः सुश्लिष्टाः सुयोजिता यत्र। तथा कुमारिकाः शक्रकुमार्यः। सारद्रुमोऽन्तः सारो वृक्षः। तस्माद्या अभग्नाः कुमारिकास्ताभिरन्वितम्। एतदुक्तं भवति - यास्ताः शक्रकुमार्यः कथितास्ताः सारवृक्षैः कार्या अभग्नोश्चेति। युगलकम्।।

कथं केतुमुत्थापयेदित्याह-

**अविरतजनरावं मङ्गलाशीः प्रणामैः पटुपटहमृदङ्गैः शङ्खभेर्यादिभिश्च।**

**श्रुतिविहितवचोभिः पापठभ्दिश्च विप्रैरशुभविहतशब्दं केतुमुत्थापयेश्च।।५९।।**

**फलदधिवृतलाजाक्षौद्रपुष्पाग्रहस्तैः प्रणिपतितशिरोभिस्तुष्टवभ्दिश्च पौरैः।**

**वृतमानिमिपभत्तः केतुमीशः प्रजानामरिनगरनताग्रं कारयेद्द्विड्वधाय।।६०।।**

प्रजानामीशो राजा। अनिमिषभर्तुः केतुम् अनिमिषा देवास्तेषां भर्तुः प्रभोरिन्द्रस्य केतुं ध्वजं द्विषां शत्रूणां बधाय। अरिनगरनताग्रं कारयेत्, अरिनगरे शत्रुपुरे नतमग्रं प्रांन्तं यस्च। कीदृशं ध्वजम्? एवंविधैः पोरैः पुरजनैर्वृतं परिवृतम्। कीदृशैः? फलानि श्रफलप्रभृतीनि। दधि क्षरीविकारः। धृतमाज्यम्। लाजा प्रसिद्धा। क्षौद्रं माक्षिकम्। पुष्पाति कुसुमानि। एतान्यग्रहस्ते दक्षिणपाणौ येषां तैः। तथा प्रणिपतितं शिरो मूर्धा येषां तैः। तुष्टवद्भिः। अत्यर्थं स्तुवद्भिः। नागरैः शुभशब्दं वाच्यमानैरिति।।

कीदृशं शोभनमुत्थानमित्याह-

**नातिद्रुतं न च विलम्बितमप्रकम्पमध्वस्तमाल्यपिटकादिविभूषणं च।**

**उत्थानमिष्टमशुभं यदतोऽन्यथा स्यात्तच्छान्तिभिर्नरपतेः शमयेत्पुरोधाः।।६१।।**

एवंविधमुत्थानमिष्टं शुभमित्यर्थः? कीदृशम्। नातिद्रुतं न त्वरितम् , न च विलम्बितं नातिध्वस्तम्। अप्रकम्पम् , प्रकम्पश्चलनं येन नोत्पद्यते। तथा अध्वस्तानि माल्यानि पिटकादीनि विभूषणानि येन तत्। आदिग्रहणाच्छत्रध्वजादर्शफलार्द्धचन्द्र इत्यादिकानि गृह्यन्ते। एतेषां ध्वंसो नाशो येन न भवति। अतोऽन्यथा यदुत्थानं तन्नरपते राज्ञोऽशुभमनिष्टं स्याद्भवेत्। तच्च पुरोधाः पुरोहितः शान्तिभिरुपघातप्रतीकारैः शमयेत्। तथा च गर्गः- **बृ.सं.,पृ-४९५**

अथोच्छ्रिते च तस्मिन् शुभाशुभज्ञानमाह श्लोकपञ्चकेन -

**क्रव्यादकौशिककपोतककाककङ्कैः केतुस्थितैर्महदुशन्ति भयं नृपस्य।**

**चापेण चापि युवराजभयं वदन्ति श्येनो विलोचनभयं निपतन् करोति।।६२।।**

**छत्रमङ्गपतने नृपमृत्युस्तस्करान्मधु करोति निलीनम्।**

**हन्ति चाप्यथ पुरोहितमुल्का पार्थिवस्य महिषीमशनिश्च।।६३।।**

**राज्ञीविनाशं पतितां पताका करोत्यवृष्टिं पिटकस्य पातः।**

**मध्याग्रमूलेषु च केतुभङ्गो निहन्ति मन्त्रिक्षितिपालपौरान्।।६४।।**

**धूमावृते शिखिमयं तमसा च मोहो व्यालैश्च भग्नपतितैर्न भवन्त्यमात्याः।**

**ग्लायन्त्युदक्पभृति च क्रमशो द्विजाद्यान् भङ्गे च बन्धकिवधः कथितः कुमार्या।।६५।।**

**रज्जूत्सङ्गच्छेदने बालपीडा राज्ञो मातुः पोडनं मातृकायाः।**

**यद्यत्कुर्युर्बालकाश्चारणा वा तत्तत्तादृग्भावि पापं शुभं वा।।६६।।**

तथा रज्जूनां यत्र कुत्रचिच्छेदने च बालानां शिशूनां पीडा भवति। तथा मातृकायास्तो-रणपार्श्वस्थस्य काष्ठस्य पीडने राज्ञो मातुर्नुपजनन्याः पीडनं भवति। चारणा विदग्धा रङ्गवरा वा, बालकाः, शिशवः, एते यद्यत्पापमनिष्टं शुभं वा कुर्युः, तत्तत्तादुग्भावि। तत्तत्तथाभूतं शुभमशुभं वा लोके भवतीत्यर्थः। कुलकम्। तथा च गर्गः- **बृ.सं.,पृ-४९७**

अथ विसर्जने विधिमाह-

**दिनचतुष्टयमुत्थितमर्चितं समभिपूज्य नृपोऽहनि पञ्चमे।**

**प्रकृतिभिः सह लक्ष्म विसर्जयेद्बलभिदः स्वबलाभिविवृद्धये।।६७।।**

बलभिद इन्द्रस्य लक्ष्म चिह्नं स्वबलाभिविवृद्धये आत्मीयबलविवृद्ध्यर्थं नृपो राजा पञ्चमेऽहनि दिवसे प्रतिपादि समभिपूज्य पूजयित्वा प्रकृतिभिर्मन्त्रिभिः सह विसर्जयेत्। कीदृशं लक्ष्म? दिनचतुष्टयं द्वादशीप्रभृतिदिनचतुष्टयं पौर्णमास्यां यावदुत्थितम् , समुत्थितम्। अर्चितं पूजितम्।।६७।।

इन्द्रध्वजविधानकर्तुः प्रभावमाह-

**उपरिचरवसुप्रवर्तिनं नृपतिभिरप्यनुसन्ततं कृतम्।**

**विधिमिममनुमन्य पार्थिवो न रिपुकृतं भयमाप्नुयादिति।।६८।।**

इमं विधिं पाथिर्ववो राजा अनुमन्य तमिन्द्रध्वजं सम्पूज्य न क्वचिदपि रिपुकृतं शत्रुकृतं भयं प्राप्नुयात्। कीदृशं विधिम् ? उपरिचरवसुप्रवर्तितम् , उपरिचरेणोर्ध्वगामिना वसुना राज्ञा प्रवर्तितम्। तथा नृपतिभी राजभिरप्यनुसन्ततमविच्छिन्नं कृतमिति।।

## ५. नीराजनाध्यायः

तत्रादावेव कालनियमभप्रदर्शनार्थमाह-

**भगवति जलधरपक्ष्मक्षपाकारार्केक्षणे कमलनाभे।**

**उन्मीलयति तुरङ्गमकरिनरनीराजनं कुर्यात्।।१।।**

भगवति परमैश्चर्ययुक्ते। कमलनाथे नारायणे। जलधरपक्ष्मक्षपाकारार्केक्षणे, जलधरा मेघास्त एव पक्ष्माण्यक्षिरोमाणि ययोस्ते क्षपाकारार्केक्षणे। क्षपाकरश्चन्द्रः। अर्क आदित्यस्तावेवेक्षणे नेत्रे। उन्मीलयति विकाशयति सति। तुरङ्गमाणामश्वानाम्। करिणां हस्तिनाम्। नराणां मनुष्यणाम्। नीरेण जलेन अजनं स्पर्शनं कुर्यात्। अनेन नीराजनस्य वर्षासु निषेध उक्त इति।।

अथ कालसमयमाह-

**द्वादश्यामष्टम्यां कार्तिकशुक्लस्य पञ्चदश्यां वा।**

**आश्वयुजे वा कुर्यान्नीरानसंज्ञितां शान्तिम्।।२।।**

कार्तिकमासशुक्लपक्षद्वादश्यां तिथावष्टम्यां वा पञ्चदश्यां पूर्णिमायाममावस्यायां वा। आश्वयुज-शुक्लपक्षे एतास्वेव तिथिषु प्रोक्तासु वा नीराजनसंज्ञितां नीराजनाख्यां शान्तिं कुर्यात्।।

अथ तद्विधानमाह-

**नगरोत्तरपूर्वदिशि प्रशस्तभूमौ प्रशस्तदारुमयम्।**

**षोडशहस्तोच्छ्रायं दशविपुलं तोरणं कार्यम्।।३।।**

नगरस्य पुरस्योत्तरपूर्वस्यामैशान्यां दिशि, प्रशस्तभूमौ शुभलक्षणसंयुतायां शल्यादिदोष-वर्जितायामवनौ, प्रशस्तदारुमयं याज्ञिकवृक्षविनिर्मितम्। षोडशहस्तोच्छ्रायमुच्छ्रितं दशहस्तविपुलं विस्तीर्णं तोरणं कार्यम्।।

अथ शान्तिगृहलक्षणमाह-

**सर्जोदुम्बरककुभशाखामयशान्तिसद्म कुशबहुलम्।**

**वंशविनिर्मितमत्स्यध्वजचक्रालङ्कृतद्वारम्।।४।।**

सर्जः। उदुम्बरः। ककुभः। एते सर्वे वृक्षविशेषाः। एषां शाखामयं लताविनिर्मित शान्तिसद्म शान्तिगृहं कार्यम्। कुशबहुलं प्रभूतकक्षमयम्। तथा वंशविनिर्मितानि वेणुरचितानि मत्स्यध्व-जचक्राणि, मत्स्यो मीनः, ध्वश्चिह्नम्, चक्रमायुधम्। एतैरलंकृतं शोभितं द्वारं यस्य तथाभूतम्।

अथाश्वादीनां दीक्षाविधानमाह-

**प्रतिसरया तुरगाणां भल्लातकशालिकुष्ठसिद्धार्थान्।**

**कण्ठेषु निबध्नीयात् पुष्टयर्थं शान्तिगृहगाणाम्।।५।।**

तुरगाणामश्वानां प्रतिसरया कुङ्कुमरञ्जितेन सूत्रेणान्येन पीतेन वा कण्ठेषु गलेषु। भल्लतकं प्रसिद्धम्। शालयः प्रसिद्धाः। कृष्ठम्। सिद्धार्था गौरसर्षयाः। एतत्पुष्टयर्थं पुष्टिकरणाय। शान्तिगृहगाणां शान्तिसद्मस्थानां निबध्नीयात्। तथा च काश्यपः- **बृ.सं.,पृ-५००**

अथ शान्तिविधानमाह-

**रविवरुणविश्वदेवप्रेशपुरुहूतवैष्णवैर्मन्त्रैः।**

**सप्ताहं शान्तिगृहे कुर्याच्छान्तिं तुरङ्गाणाम्।।६।।**

रविरादित्यः। वरुणोऽपाम्पतिः। विश्वेदेवा देवविशेषाः। प्रेशो ब्रह्मा। पुरुहूत इन्द्रः। विष्णुर्नारायणः। एषां सप्तभिर्मन्त्रैस्तुरङ्गाणामश्वानां शान्तिगृहे स्थितानां सप्ताहं सप्तदिनानि शान्तिं कुर्यात्। तथा च काश्यपः। **बृ.सं.,पृ-५००**

अथाश्वानां किं कुर्यादित्याह-

**अभ्यर्चिता न परुषं वक्तव्या नापि ताडनीयास्ते।**

**पुण्याहशङ्खतुर्यध्वनिगीतरवैर्विमुक्तभयाः।।७।।**

ते अश्वा अभ्यर्चिताः पूजिताः। परुषमप्रियं न वक्तव्याः। नापि ते ताडनीयाः। कषादिभिर्न हन्तव्याः। तथा पुण्याहरवैः शुभवाक्यशब्दैः माङ्गलीयकैर्वचनैः शङ्खध्वनिभिः शङ्खशब्दैः। तूर्यध्वनिभिःतूर्यशब्दैः। गीतरवैर्गीतशब्दैश्च। विमुक्तं परित्यक्तं भयं भीतिर्यैस्ते तथाविधाः कार्याः।।

तत : सप्ताहात् परतः किं कुर्यादित्याह-

**प्राप्तेऽष्टमेऽह्नि कुर्यादुदङ्मुखं तोरणस्य दक्षिणतः।**

**कुशचीरावृतमाश्रममग्निं पुरतोऽस्य वेद्यां च।।८।।**

प्राप्तेऽष्टम इति। ततोऽष्टमेऽह्नि दिवसे प्राप्ते तोरणस्य प्राङ्निर्दिष्टस्य दक्षिणभागे आश्रममुद-ङ्मुखमुत्तराभिमुखं कुशचीरावृतं कुशैर्दर्भैश्चीरेवृक्षवल्कलैरावृतं छादितं कुर्यात्। अस्य पुरतोऽग्रतो वेद्यामग्निं कुर्यात्। वेदीलक्षणमत्राचार्येणोक्तमस्माभिरन्यशास्त्रात् प्रदर्श्यते-

अथ सम्भाराणां लक्षणमाह-

**चन्दनकुष्ठसमङ्गाहरितालमनः शिलाप्रियङ्गुवचाः।**

**दन्त्यमृताञ्चनरनीसुवर्णपुष्प्यग्निमन्थाश्च।।९।।**

**श्वेतां सपूर्णकोशां कटम्भरात्रायमाणसहदेवीः।**

**नागकुसुमं स्वगुप्तां शतावरीं सोमराजीं च।।१०।।**

**कलशेष्वेताः कृत्वा सम्भारानुपहरेद्बलिं सम्यक्।**

**भक्ष्यैर्नानाकारैर्मधुपायसयावकप्रचुरैः।।११।।**

चन्दनं मलयजम्। कुष्ठं प्रसिद्धम्। समङ्गा मञ्जिष्ठा। हरितालं प्रसिद्धम्। मनःशिला प्रसिद्धैव। प्रियङ्गुर्गन्धप्रियङ्गुः। वचा प्रसिद्धैव। दन्ती प्रसिद्धैव। अमृता गुडूची। अञ्जनं स्त्रोतोञ्जनं प्रसिद्धं सौभाञ्जनं वा। रनी हरिद्रा। सुवर्णपुष्पी प्रसिद्धैव। अग्निमन्था तर्कारी।

श्वेता गिरिकर्णिका, तां च संपूर्णकोशां पूर्णकोशयां सह। कटम्भरां महाश्वेताम्। त्रायमाणं प्रसिद्धम्। सहदेवीं सहगन्धाम्। नागकुसुमं नागपुष्पम्। स्वगुप्तामात्मगुप्तां कपिकच्छुमित्यर्थः। शतावरी प्रसिद्धा। सोमरी सोमवल्ली।।

एताश्चौषधीः कलशेषु पूर्णघटेष्वभ्यन्तरे कृत्वा संस्थाप्य सम्भारानेतानेव ततः सम्यग्यथाविधानेन बलिमुपहरेत् ढौकयेत्। भक्ष्यैर्मोदकैर्लोपिकापूपादिभिः। नानाकारैर्बहुविधैः। कीदृशैर्मधुपायसयावकप्रचुरैः। मधु माक्षिकम्। पायसं पयोविकारो यत्किञ्चित्क्षीरसम्भवम्। यावकं यावप्रकारः। एतैः प्रचुराः प्रभूता येषु तैः।।

अन्यच्च-

**खदिरपलाशोदुम्बरकाश्मर्यश्वत्थनिर्मिताः समिधः।**

**स्त्रुक् कनकाद्रजताद्वा कर्तव्या भूतिकामेन।।१२।।**

खदिरः। पलाशः उदुम्बरः। काश्मरी। अश्वत्थः। एते सर्व एव वृक्षविशेषा याज्ञिकाः सुप्रसिद्वाः। एभ्यो निर्मिताः सम्भूताः समिधः कार्याः। तथा भूतिकामेन समृद्धिमिच्छता स्त्रुक् कनकात् सुवर्णात् रजताद्वा कर्तव्या।।

ततः किं कुर्यादित्याह-

**पूर्वाभिमुखः श्रीमान् वैयाघ्रे चर्मणि स्थितो राजा।**

**तिष्ठेदनलसमीपे तुरगभिषग्दैववित्सहितः।।१३।।**

राजा नृपः। श्रीमान् श्रीर्विद्यते यस्य। त्रिवर्गसमाश्रयः। श्रीमानित्यनेन राज्ञो महिमानं दर्शयति। सकलप्रतिपत्तियुक्तस्तत्रस्थ इत्यर्थः। पूर्वाभिमुखः पूर्वस्यां दिशि निरीक्षमाणो वैयाघ्रे व्याघ्रस्य चर्मणि स्थित उपविष्टः। अनलसमीपेऽग्निसन्निधौ तुरगभिषग्दैववित्सहितः, तुरगभिषजा अश्ववैद्येन दैवविदा सांवत्सरिकेण सहितः संयुक्तस्तत्र तिष्ठेत्।।

अथ दैवविदा तत्र किं कार्यमित्याह-

**यात्रायां यदभिहितं ग्रहयज्ञविधौ महेन्द्रकेतौ च।**

**वेदीपुरोहितानललक्षणमस्मिस्तदवधार्यम्।।१४।।**

वेद्या अग्न्यागारस्य। पुरोहितस्य हेतुः। अनलस्याग्नेः। लक्षणं यात्रायामभिहितं कथितम्। क्व ग्रहयज्ञविधौ। ग्रहाणां यज्ञविधाने। तथा महेन्द्रकेताविन्द्रध्वे च यदुक्तं तदस्मिन्नीराजने अवधार्यं लक्षणीयमिति। तथा च यात्रायां ग्रहयज्ञे –

ततः किं कुर्यादित्याह-

**लक्षणयुक्तं तुरगं द्विरदघरं चैव दोक्षितं स्नातम्।**

**अहतरिसाम्बरगन्धस्त्रग्धूपाभ्यचितं कृत्वा।।१५।।**

**आश्रमतोरणमूलं समुपनयेत्सान्त्वयञ्छनैर्वाचा।**

**वादित्रशङ्खपुण्याहिनः स्वनापूरितदिगन्तम्।।१६।।**

तुरगमश्वम्। द्विरदवरं हस्तिप्रधानं च। लक्षणयुक्तं तुरङ्गं वक्ष्यमाणैः शोभनैरश्वलक्षणै-र्दीर्घग्रीवाक्षिकूट इत्यादिलक्षणैश्च युक्तम्। तथा द्विरदवरैर्हस्तिलक्षणैस्ताम्रोष्ठतालुवदना इत्यादि-कैश्च युक्तमढ। दीक्षितं कृतदीक्षं च स्नातम्। अहतेनाक्षतेन सितेन शुक्लेनाम्बरेण वस्त्रेण स्त्रग्भिर्मालाभिर्धूपैर्गुग्गुलु-प्रभृतिरभ्यर्चितं पूजितं कृत्वा।

तत आश्रमतोरणमूलम् स्वाश्रमसमीपे यत्तोरंण तन्मूलं तत्र वाचा गिरा सान्त्वयन् शान्तिं कुर्वन् शनैः शनैर्मन्दं मन्दं समुपनयेत् प्रापयेत्। कीदृशं तोरणमूलम् ? वादित्रशङ्खपुण्या-हनिः स्वनापूरितदिगन्तम्। वादित्राणां पटहमृदङ्गाना पुण्याहानां शुभशब्दानां निःस्वनैः शब्दैरापूरिता जडीकृता दिगन्ता यत्र तथाभूतम्।

अथाश्वगजयोश्चेष्टितमाह-

**यद्यानीतस्तिष्ठेद्दक्षिणचरणं हयः समुत्क्षिप्य।**

**स जयति तदा नरेन्द्रः शत्रूनचिराद्विना यत्नात्।।१७।।**

**त्रस्यन्नेष्टो राज्ञः परिशेषं चेष्टितं द्विपहयानाम्।**

**यात्रायां व्याख्यातं तदिह विचिन्त्यं यथायुक्ति।।१८।।**

**पिण्डमभिमन्त्र्य दद्यात्पुरोहितो वाजिने स यदि जिघ्रेत्।**

**अश्नीयाद्वा जयकृद्विपरीतोऽतोऽन्यथाभिहितः।।१९।।**

पुरोहितं आचार्यो वाजिने अश्वाय पिण्डमन्नपिण्डमभिमन्त्र्य दद्यात् प्रयच्छेत्। सोऽश्वो यदि तत् पिण्डं जिघ्रेत् किञ्चिदश्नीयाद् भक्षयेद् वा , तदा जयकृत्, राज्ञां जयं करोति। अतोऽन्यथा यदि न जिघ्रन्नपि भक्षयेत्, तदा विपरीतोऽभिहितः पराजकृदुक्त इति।।

अथ नीराजनमाह-

**कलशोदकेषु शाखामाल्पाव्यौदुम्बरीं स्पृशेत्तुरगान्।**

**शान्तिकपौष्टिकमन्त्रैरेवं सेनां सनृपनागाम्।।२०।।**

कलशोदकेषु कलशस्थलेषु प्राक्स्थापितेष्वौषमिश्रितेष्वौदुम्बरीमुदुम्बरवृक्षसम्भवां शाखां लतामाप्लाव्य मज्जयित्वा तया तुरगान् अश्वान् स्पृशेत्। शान्तिकैः पौष्टिकैश्च मन्त्रैः सह। एवमनेन प्रकारेण सनृपनागां शेनां स्पृशेत्। नृपो राजा। नागा हस्तिनः। तत्संयुक्तां चमूं स्पृशेत्।।

ततः किं कुर्यादित्याह-

**शान्तिं राष्ट्रविवृद्धयै कृत्वा भूयोऽभिचारकैर्मन्त्रैः।**

**मृन्मयमरिं विभिन्द्याच्छूलेनोरः स्थले विप्रः।।२१।।**

भूयः पुना राष्ट्रविवृद्धयै राष्ट्रसंवर्धनाय शान्ति कृत्वा ततोऽभिचारकैर्मन्त्रैः अभिचार-कर्मणि ये मन्त्रा आथर्वणा उक्तास्तैर्मन्त्रैर्मृन्मयं मृत्तिकारचितमरिं शत्रुमुरः स्थले वक्षः प्रदेशे विप्रो ब्राह्मणः शूलेनाग्रतीक्ष्णेन काष्ठेन विभिन्द्याद् विदारयेत्।।

ततः किं कुर्यादित्याह-

**खलिनं हयाय दद्यादभिमन्त्र्य पुरोहितस्ततो राजा।**

**आरुह्योदक्पूर्वा यायान्नीराजितः सबलः।।२२।।**

ततोऽनन्तरं पुरोहितः खलिनं कविकामभिमन्त्र्य मन्त्रयित्वा हयायाश्वाय दद्यात् प्रयच्छेत्। तस्मिन नृप आरुह्य नीरातिः सबलो बलसहितः सेनासहित उदक्पूर्वामैशानीं यायाद् गच्छते।।

कथं राा गच्छेदित्याह-

**मृदङ्गशङ्खध्वनिहृष्टकुञ्जरस्त्रवन्मदामोदसुगन्धिमारुतः।**

**शिरोमणिप्रान्तचलत्प्रभाचयैर्ज्वजलन्विवस्वानिव तोयदात्यये।।२३।।**

**हंसपङ्क्तिभिरितस्ततोऽद्रिराट् सम्पतभ्दिरिव शुक्लचामरैः।**

**मृष्टगन्धपवनानुवाहिभिर्धूयमानरुचिरस्त्रगम्बरः।।२४।।**

**नैकवर्णमणिवज्रभूपितैर्भूषितो मुकुटकुण्डलाङ्गदैः।**

**भूरिरत्नकिरणानुरञ्जितः शक्रकार्मुकरुचं समुद्वहन्।।२५।।**

**उत्पतभ्दिरिव खं तुरङ्गमैर्दारयभ्दिरिव दन्तिभिर्धराम्।**

**निर्जितारिभिरिवामरैर्नरैः शक्रवत्परिवृतो व्रजेन्नृपः।।२६।।**

मृदङ्गेति। नृपो राजा नीरातिस्तोयदात्यये शरदि विवस्वानादित्यो ज्वलन् कान्तिमानिव व्रजेत्। तोयदा मेघास्तेषामत्ययो विनाशः शरदित्यर्थः। कीदृशः? मृदङ्गशङ्खध्वनिहृष्टकुञ्च-रस्त्रवन्मदामोद-सुगन्धमारुतः , मृदङ्ग वादित्रविशेषाः, शङ्खाः प्रसिद्धाः, मृदङ्गशङ्खानां योऽसौ ध्वनिः शब्दस्तेन हृष्टा मुदिता ये कुञ्जरा हस्तिनस्तेषां स्त्रवन्मदं मदजलं तस्यामोदः सौरभ्यं तेन सुगन्धीकृतो यो मारुतो वायुस्तेन यो युक्तः स तथोक्तः। यतः शरदि किल सुगन्धो मारुतो वहति। तथा शिरोमणयश्चूडारत्नानि तेषु प्रान्तमग्रं तत्र चलन्तः स्फुरन्तो ये प्रभाचया रश्मिसमूहास्तैर्ज्वलन् देदीप्यमानः। शरदि किल सूर्यस्तेजस्वी भवति।

अथवा अद्रिराट् पर्वतरो हिमवानिव व्रजेत। इतस्ततः सर्वतः शुक्लचामरैः सितैर्बाल-व्यजनैः सम्पद्भिस्तदभिमुखं गच्छद्भिः। धूयमानाश्चाल्यमाना रुचिरा दीप्तिमत्यः स्त्रजोमाला अम्बराणि च वस्त्राणि यस्य स तथोक्तः। कीदृशैश्चामरैः? मृष्टगन्धपवनानुवाहिभिः। मृष्टं गन्धं सुगन्धं पवनं वातं येऽनुवहन्ति सेवन्ते तैस्तथाभूतैः। अत एवोत्प्रेक्षते- हंसपंक्तिभिरितस्ततः सर्वतः सम्पतद्भिर्मृष्टगन्धपवनानुवाहिभिः सुगन्धमारुतानुवाहिभिरद्रिराडिव।

अथवा शक्रकार्मुकरुचिमिन्द्रधनुः कान्तिं समुद्वहन् वाहयन् व्रजेत्। मुकुटकुण्डलाङ्गदै-र्भूषितः मुकुटं मौलिभूषणम् , कुण्डलं कर्णाभरणम्, अङ्गदाः कटकास्तैर्भूषितोऽलंकृतः। कीदृशैः? नैकवर्णमणि-व्रभूषितैः नैकवर्णा बहुवर्णा ये मणयो रत्नानि, वज्रं हरीकम्, तैर्भूषिता अलंकृता ये मुकुटकुण्डलाङ्ग-दास्तैर्भूषितोऽलंकृतः। तथा भूरिरत्नानां बहूनां मणीनां ये किरणा

रश्मयस्तैरनुरज्जितो विच्छुरितस्तदा शक्रकार्मुकरुरुचिं समुद्वहन्। यतः शक्रकार्मुकस्य कान्तिर्नानावर्णा भवति।

अथवा शक्रकविन्द्रत्परिवृतः परिवारयुक्तो व्रजेत्। तुरङ्गमैरश्वैः खमाकाशमुत्पतद्भिरिव। यत इन्द्र आकाशे गच्छति। तथा दन्तिभिर्हस्तिभिर्धरां भूमिं धारयद्भिरिव। यतो मत्तदन्तिनो भूमिं विदारयन्ति। नरैर्मनुष्यैर्निर्जितारिभिर्जितशत्रुभिरमरैर्देवैरिव परिवृतः। अतीवोज्ज्वलं वेषधारित्वात्। अत एवोत्प्रेक्षतै- शक्रवदिति।।

अन्यदप्याह-

**सवज्रमृक्ताफलभूषणोऽथवा सितस्त्रगुष्णीषविलेपनाम्बरः।**
**धृतातपत्रो गजपृष्ठमाश्रितो घनोपरीवेन्दुतले भृगोः सुतः।।२७।।**

**सम्प्रहृष्टनरवाजिकुञ्जरं निर्मलप्रहरणांशुभासुरम्।**
**निर्विकारमरिपक्षभीषणं यस्य सैन्यमचिरात्स गां जयेत्।।२८।।**

यस्य राज्ञ ईदृशं सैन्यं स राा अचिराच्छीघ्रमेव गां भूमिं जयेतं स्वीकरोति। कीदृशम? सम्प्रहृष्टनवाजिकृञ्जरम्, सम्प्रहृष्टाः प्रमुदिता नरा मनुष्याः। वाजिनोऽश्वाः कुञ्जरा यत्र। तथा निर्मलानां प्रहरणानां खड्गादीनां ये अंशवो रश्मयस्तैर्भासुरं देदीप्यमानम्। निर्विकारं विकाररहितम्। निरुत्पातमित्यर्थः। अरिपक्षभीषणं शत्रुपक्षभयावहमिति।।

## ६. खञ्जनकलक्षणाध्यायः

तत्रादावेवागमप्रदर्शनार्थमाह–

**खञ्जनको नामायं यो विहगस्तस्ब दर्शने प्रथमे।**

**प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि।।१ ।।**

अयं खञ्जनकनामा विहगः पक्षी तस्य प्रथमे दर्शने, आदौ यस्मिन् दिने दृश्यते तत्र मुनिभिर्गगादिभिर्यानि फलानि कथितानि प्रोक्तानि तानि प्रवक्ष्यामि कथयामीति।

खञ्जनकः श्रावणपूर्वकमासचतुष्टयं न दृश्यत इति स्थितिः। अत उक्त दर्शने प्रथमे इति।।

तत्र तावच्चत्वारः खञ्जनका भवन्ति, तेषां नामानि फलं चाह–

**स्थूलोभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः।**

**आकण्ठमुखात्कृष्णः सम्पूर्णः पूरयत्याशाम्।।२ ।।**

**कृष्णो गलेऽस्य बिन्दुः सितकरटान्तः स रिक्तकृद्रिक्तः।**

**पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः।।३ ।।**

**अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु।**

**करितुरगभुजगमूर्न्धि प्रासादोद्यानहर्म्येषु।।४ ।।**

**गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे।**

**हस्तितुरङ्गमशालाच्छत्रध्वजचामराद्येषु।।५ ।।**

**हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु।**

**दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते।।६ ।।**

अथैतेषु स्थानेषु दृष्टः खञ्जनकः श्रियं लक्ष्मीं कुरुते विदधाति। केषु, कथम? मधुरेति। अथशब्दः प्रकाराय। मधुराणि स्वादूनि। सुरभीणि सुगन्धानि फलानि, कुसुमानि नाम, तुरङ्गाणामश्वानाम्, भुजगानां सर्पाणां मूर्धसु मस्तकेषु। तथामरप्रासादेषु देवगृहेषु। उद्यानेषूपवनेषु। हर्म्येषु अट्टालिकासु।

तथा गोरुपरि। गोष्ठे गवां स्थाने। सतां साधूनां यत्र समागमः। यज्ञो यागः। उत्सवो विवाहादि। पार्थिवो राजा। द्विजो ब्राह्मणः। एषां समीपे सन्निधौ। हस्तिशालासु गजशालासु।

अश्वशालासु। छत्रमातपत्रम् ध्वजश्चिह्नविशेषः प्रसिद्धः। चामरं बालव्यजनम्। आदिग्रहणाद् भृङ्गारकुम्भतालवृन्तादयः। एतेष्वपि।

तथा हेमसमीपे सुवर्णसन्निधौ। सिताम्बरं श्वेतवस्त्रम्। कमलं पद्मम्। उत्पलं नीलोत्पलम्। पूजितेष्वर्चितेषु। उपलिप्तेषु संस्कृतेषु स्थानेषु। दधिपात्रे दधिभाजने। धान्यकूटे धान्यराशौ। एतेष्विति।।

अन्येष्वप्याह-

**पङ्के स्वाद्वन्नप्तिर्गोरससन्पच्च गोमयोपगते।**

**शाद्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः।।७।।**

**गृहपटलेऽर्थभ्रंशो वध्रे वन्घोऽशुचौ भवति रोगः।**

**पृष्ठे त्वजाविकानां प्रियसङ्गममावहत्याशु।।८।।**

पङ्कः कर्दमस्तत्रं संस्थे खञ्जनके स्वाद्वन्नाप्तिः मृष्टभोजनलाभः। तथा गोमयोपगते गोमयनिचयस्थे गोरससम्पन्मथितबाहुल्यम्। शाद्वलगे दूर्वास्थे वस्त्रप्तिरम्बरलाभः। शकटस्थे शकटारूढे देशस्य विभ्रंशो नाशः।

गृहपटले गृहच्छादने अर्थस्थ वित्तस्य भ्रंशो नाशः। बध्रे चर्ममये बन्धो बन्धनम्। अशुचावशुद्धे स्थाने रोगो भवति। अजश्छागः। अविः प्रसिद्धः। अजाविकानां पृष्ठे उपरि स्थिते आशु क्षिप्रमेव प्रियसङ्गमं वल्लभसमायोगमावहति करोति।।

अन्यदप्याह-

**महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्कराष्टस्थः।**

**प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः।।९।।**

एतेषु स्थानेषु खञ्जनको दृष्टः स चाशुभः प्राग्लक्षणो न भवति तदा मरणरुग्भयदः। द्रष्टुर्मरण मृत्युं रुग्भयं च ददाति। केषु स्थानेषु? मृहिषे। उष्ट्रे करभे। गर्दभे खरे। अस्थि-श्मशाने पितृवने। गृहकोणे वेश्माग्रे। शर्करे मृत्खण्डे मृत्यखण्डे। अट्टे अट्टालके। प्राकारभितौ। भस्मानि। केशेषु।एतेषु स्थानेषु।।

अन्यदपि लक्षणमाह-

**पक्षौ धुन्वन्नशुभः शुभः पिबन् वारि निम्नगासंस्थः।**

**सूर्योदये प्रशस्तो नेष्टफलः खञ्जनोऽस्तमये।।१०।।**

पक्षावङ्गरुहौ धुन्वन् कम्पयन्नशुभोऽनिष्टफलदः। निम्नगा नदी तत्रस्थो वारि जलं पिबन् शुभ इष्टफलः। केचिद्वारिवाहस्थ इति पठन्ति। वारिवाहे जलगमनप्रदेशे वारि पिबन्। सूर्योदये रव्यूदयकाले खञ्जनकः प्रशस्तः शुभफलदः। सूर्यास्तमये नेष्टफलोऽशुभ इति।

अन्यदप्याह-

**नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम्।**

**पश्येत्तया गतस्य क्षिप्रमरातिर्वशमुपैति।।११।।**

निवृत्ते परिसमाप्ते नीराजने नृपो राजा यया दिशा आशया खञ्जनं यान्तं पश्येदव-लोकयेत्तया गतस्य राज्ञोऽरातिः शत्रुः। क्षिप्रमाश्वेव वशमुपैति वश्यतां गच्छति।।

अथ प्रत्ययप्रदर्शनार्थमाह-

**तस्मिन्निधिर्भवति मैथुनमेति यस्मिन् यस्मिंस्तु छर्दयति तत्र तलेऽस्ति काचम्।**

**अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य तत्कौतुकापनयनाय खनेद्धरित्रीम्।।१२।**

**मृतविकलविभिन्नरोगितः स्वतनुसमानफलप्रदः खगः।**

**धनकृदभिनिलीयमानको वियति च बन्धुसभागमप्रदः।।१३।।**

**नृपतिरपि शुभं शुभप्रदेशे खगमवलोक्य महीतले विदध्याते।**

**सुरभिकुसुमघूपयुक्तमर्घं शुभमभिनन्दितमेवमेति वृद्धिम्।।१४।।**

नृपती राजा शुभे प्रदेशे शुभं प्रशस्तलक्षणमपि खगं पक्षिणमवलोक्य दृष्ट्वा महीतखे भूपृष्ठे सुरभिकुसुमयुक्तमर्घम्, सुरभीणि सुगन्धीनि यानि कुसुमानि पुष्पाणि तथा सुगन्धा ये धूपास्तैः संयुक्तमर्घं विदध्याद् दापयेत्। एवमनेन प्रकारेण शुभं फलमभिनन्दितं सम्मानितं वृद्धिमेति वृद्धिं गच्छति।।

अथाशुभे खञ्जनके दृष्टे विधानमाह-

**अशुभमपि विलोक्य खञ्जनं द्विजगुरुसाधुसुरार्चने रतः।**

**न नृपतिरशुभं समाप्नुयान्न यदि दिनानि न सप्त मांसभुक्।।१५।।**

नृपती राजा अशुभमपि अनिष्टफलमपि खञ्जनं विलोक्य दृष्ट्वा यदि द्विजानां ब्राह्मणानाम, गुरूणामुपदेशकर्तुणाम्, साधूनां सज्जनानाम्, सुराणां देवानाम्, अर्चने रतः सक्तो

भवति, तदा नाशुभमनिष्टफलं समाप्नुयात् प्राप्नोति।यदि सप्त दिनानि सप्ताहं मांसभुग् न भवति। मांसं यदि न भुङ्क्ते नाश्नाति।।

तथा कालप्रदर्शनार्थमाह-

**आवर्षात्प्रथमे दर्शने फलं प्रतिदिनं तु दिनशेषात्।**

**दिक्स्थानमूर्तिलग्नक्षशान्तदीप्तादिभिश्चोह्यम्।।१६।।**

प्रथमं खञ्जनकस्य दर्शने आदावेव यस्मिन्नहनि दृश्यते तत्र यत्फलं शुभमशुभं वा तदाऽऽवर्षाद्वर्षं यावत्। वर्षमध्ये भवतीत्यर्थः। प्रतिदिनं तु यद्दर्शनफलं तद्दिनशेषात्तस्मिन्नेव दिनमध्ये भवति। तथा च काश्यपः- **बृ.सं.,पृ-५१५**

दिक्स्थानमूर्तिलग्नर्क्षशान्तदीप्तादीभिश्चोह्यम्, दिक् कस्यां दिशि स्थितः शुभायामशुभायां वा। तत्र पूर्वोत्तरैशान्यः स्वभावादेव शुभाः। शेषा अशुभाः। स्थानं यत्र स्थितः। अथ मधुरसुरभिः इत्यादिना प्रदर्शितम्। मूर्तिः शरीराकारः – स्थूलाऽभ्युन्नतकण्ठः इत्यादि मृतविकलविभिन्न-रोगितः इति च। लग्नं तत्काले कीदृशं शुभराशिशुभग्रहयुपं दृष्टं वा ध्रुवाणि मृदूनि च शस्तानि, क्षिप्रचरसाधारणानि मध्यानि, दारुणोग्राणि अशोभनानीति। तथा शान्तदीप्तादिभिः। स पक्षी किं शान्तायां दिशि स्थितः, शान्तरवश्च, किं वा दीप्तायां दिशि स्थितो दीप्तरवश्च। आदिग्रहणादङ्गा-रिताभिधूमिता च दिग् ज्ञेया। एवमादिभिः शुभमशुभं व्यामिश्रं वा फलमूह्यम्। स्वबुद्ध्या तर्कणीयम्। एतदाचार्यः सविस्तरं शाकुने वक्ष्यति। वयमपि तत्रैव विशेषं व्याख्यास्याम इति।।

## ७. उत्पाताध्यायः

तत्रादावेवागमवस्तुप्रदर्शनार्थमाह-

**यानत्रेरुत्पातान् गर्गः प्रोवाच तानहं वक्ष्ये।**

**तेषां संक्षेपोऽयं प्रकृतेरन्यत्वमुत्पातः।।१।।**

अत्रेर्मुनिप्रधानस्य यानुत्पातानद्भुतान् गर्गः प्रोवाचोक्तवान्, तानहं वक्ष्ये कथयिष्ये। तेषामुत्पातानामयं संक्षेपः समासः। प्रकृतेरन्यत्वमुत्पात इति। प्रकृतेः स्वभावादन्यत्वं वैपरीत्यं स एवोत्पात इति। तथा च समाससंहितायाम्- **बृ.सं.,पृ-५१६**

कथमुत्पाता उतपद्यन्त इत्याह-

**अपचारेण नराणामुपसर्गः पापसञ्चयाद्भवति।**

**संसूचयन्ति दिव्यान्तरिक्षभौमास्त उत्पाताः।।२।।**

नराणां पुरुषाणामपचारेविनयेन पापसञ्चयो भवति, पापसञ्चयादुपसर्गा उपद्रवाः। तथा च गर्गः- **बृ.सं.,पृ-५१६**

ततो दिव्यान्तरिक्षभौमा उत्पाताः तानुपसर्गान् संसूचयन्ति। दिवि आकाशे भवा दिव्याः। अन्तरिक्षे भवा आन्तरिक्षाः। भूमौ भवा भौमा इति।।

कथमुत्पाता उत्पद्यन्त इत्याह-

**मनुजानामपचारादपरक्ता देवताः सृजन्त्येतान्।**

**तत्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयुज्जीत।।३।।**

मनुजानां मनुष्याणामपचारादविनयाद्देवताः सुरा अपरक्ता विरक्ता एतानुत्पातान् सृजन्त्युत्पादयन्ति। तत्प्रतिघाताय तेषामुत्पातानां प्रतिघाताय निवारणाय नृपो राजा राष्ट्रे जनपदे शान्तिमुत्पातप्रतीकारं प्रयुञ्जीतं कारयेदिति। तथा च गर्गः- **बृ.सं.,पृ-५१७**

अधुना दिव्यान्तरिक्षभौमानामुत्पातानां प्रविभागमाह-

**दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः।**

**गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत्।।४।।**

**भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति।**

**नाभसमुपैति मृदुतां शाम्यति नो दिव्यमित्येके।।५।।**

ग्रहाणामादित्यादीनामृक्षाणामश्वियादीनां च यद्वैकृतं विकारस्तद्दिव्यमुत्पातम्, पश्चोल्का-निर्घातः पवनो विकृतो वायुः, परिवेषः सूर्याचन्द्रमसोः गन्धर्वपुरं गन्धर्वनगरम्, पुरन्दर-चापमिन्द्रधनुः, आदिग्रहणा-द्रोहितैरावतदण्डपरिघा गृह्यन्ते। एवमादि यत्तदान्तरिक्षमुत्पातम्।

भौमं चरस्थिरभवमिति। चराणां वस्तूनां स्थैर्य स्थिराणां चरत्वं तदुद्भवं तदुत्पन्नं यत्तद्भौम-मुत्पातम्। तथा च गर्गः- **बृ.सं.,पृ-५१७**

तच्छान्तिभिराहतं शममुपैति। तच्च भौमं शान्तिभिराहतं निवारितं शममुपैति शान्ति-मुपगच्छति। नाभसमान्तरिक्षं शान्तिभिराहतं मृदुतामुपैति मन्दत्वं गच्छति। शाम्यति नो दिव्यमित्येके। दिव्यं शान्ति-भिराहतं नो शाम्यति न शान्तिं यात्येवमित्येके केचिद्वदन्ति।

अथात्र स्वमतमाह-

**दिव्यमपि शममुपैति प्रभूतकनकान्नगोमहीदानैः।**

**रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च।।६।।**

अपिशब्दः सम्भावनायां वर्तते। प्रभूतकनकान्नगोमहीदानैर्दिव्यमपि शममुपैति। कनकं सुवर्णम्। अन्नं भोज्यम्। गावो धेनवः। मही भूः। एषां प्रभूतैर्बहुभिः प्रदानैर्दिव्यमुत्पातं शममुपैति। अपि ग्रहणान्नाभसं भौमं च। तथा रुद्रायतने शिवगृहे। भूमाववनौ। गोहोहाद् गवा दोहनात्। कोटिहोमाच्च दिव्यमपि शशमुपैदि।।

दैवमुत्पातं नृपतेः कतिविधं परिपाकमायातीत्याह-

**आत्मसुतकोशवाहनपुरदारपुरोहितेषु लोके च।**

**पाकमुपयाति दैवं परिकल्पितमष्टवा नृपतेः।।७।।**

दैवमुत्पातं नृपते राज्ञोऽष्टधा परिकल्पितमष्टभिः प्रकारैः पाकमुपयाति फलं ददाति। तद्यथा-आत्मनि सुते पुत्रे। कोशे भाण्डागारे। वाहनेष्वश्वादिषु। पुरे नगरे। दारेषु भार्यासु। पुरोहिते आचार्ये। एतेषु तथा लोके जनपदे। एवमष्टप्रकारम्। तथा च गर्गः- **बृ.सं.,पृ-५१८**

अधुनोत्पातान् प्रदर्शयितुमाह-

**अनियमित्तभङ्गचलनस्वेदाश्रुनिपातजल्पनाद्यानि।**

**लिङ्गर्चायतनानां नाशाय नरेशदेशानाम्।।८।।**

लिङ्गं माहेश्वरम्। अर्चा सुरप्रतिमा। आयतनं देवनिर्मितं पुण्यस्थानम्। एषां लिङ्गार्चायतनानाम-निमित्तं विना कारणं भङ्गः स्फोटनम्। चलनं कम्पनम्। स्वेदः प्रस्वेदः। अश्रु रोदनम्। निपातः पातनम्। जल्पनं सम्भाषणम्। आद्यग्रहणाद्गमनं प्रसर्पणं च। तथा च गर्गः- **बृ.सं.,पृ-५१९**

एतानि सर्वाणि यथोक्तानि नरेशदेशानाम्। नरेशस्य राज्ञः। देशस्य जनपदस्य च नाशाय भवन्ति।।

अथान्यदप्याह-

**दैवतयात्राशकटाक्षचक्रयुगकेतुभङ्गपतनानि।**

**सम्पर्यासनसादनसङ्गश्च न देशनृपशुभदाः।।९।।**

**ऋषिधर्मपितृब्रह्मप्रोद्भूतं वैकृतं द्विजातीनाम्।**

**यद्रुद्रलोकपालोद्भवं पशूनामनिष्टं तत्।।१०,११,१२।।**

**रक्षः पिशाचगुह्यकनागानामेवमेव निर्दिष्टम्।**

**मासैश्चाप्यष्टाभिः सर्वेषामेव फलपाकः।।१३, १४।।**

**बुद्ध्वा देवविकारं शुचिः पुरोधास्त्र्यहोषितः स्नातः।**

**स्नानकुसुमानुलेपनवस्त्रैरभ्यर्चयेत् प्रतिमाम्।।१५।।**

**मधुपर्केण पुरोधा भक्ष्यैर्बलिभिश्च विधिवदुपतिष्ठेत्।**

**स्थालीपाकं जुहुयाद्विधिवन्मन्त्रैश्च तल्लिङ्गैः।।१६।।**

**इति विबुधविकारे शान्तयः सप्तरात्रं द्विजविबुधगणार्चा गीतनृत्योत्सवाश्च।**

**विधिवदवनिपालैर्यैः प्रयुक्ता न तेषांभवति दुरितपाको दक्षिणाभिश्च रुद्धः।।१७।।**

इत्येनन विधानेन विबुधविकारे सुरविकृतौ सप्तरात्रं सप्ताहं शान्तयः कर्तव्याः। द्विजातीनां ब्राह्मणानां विबुधानां देवानां गणानां गजवक्त्रप्रभृतीनाम्। अथवा द्विजगणानां ब्राह्मणानां समूहानां विबुधगाणानां देववृन्दानामर्चा पूजाः तथा गीतं नृत्यमुत्सवाश्व रात्रिजागरणं कार्यम्। एते यैरवनिपालै राजर्विधिवत्सम्यग्विधानेन प्रयुक्ताः कारिताः तेषां राज्ञां दुरितपाक उत्पातानिष्टफलं न भवति। यतो दक्षिणाभिश्च रुद्धो निवारित इति।।

अथान्यानुत्पातानाह-

**राष्ट्रे यस्यानग्निः प्रदीप्यते दीप्यते च नेन्धनवान्।**

**मनुजेश्वरस्य पीडा तस्य च राष्ट्रस्य विज्ञेया।।१८।।**

यस्य मनुजेश्वरस्य राज्ञो राष्ट्र जनपदे अनग्निः प्रदीप्यते विनाग्निना ज्वाला दृश्यते। तथेन्धनवान् काष्ठयुक्तोऽग्निर्न दीप्यते न ज्वलति। यत्रैवं तत्र मनुजेश्वरस्य राज्ञस्तस्य च राष्ट्रस्य देशस्य पीडा विज्ञेया ज्ञातव्या।।

अन्यदाह-

**जलमांसार्द्रज्वलते नृपतिवधः प्रहरणे रणो रौद्रः।**

**सैन्यग्रामपुरेषु च नाशो वह्नेर्भयं कुरुते।।१९।।**

जलमुदकम्। मांसमामिषम् आर्द्रमशुष्कं यात्किञ्जित्। एषां ज्वलने नृपतिवधो राज्ञो मरणम्। प्रहरणे आयुधे खड्गादौ ज्वलिते रौद्रो घोरो रणः सङ्ग्राम। सैन्ये सेनायाम्। ग्रामे। पुरे च नगरे। एतेषु वह्नेरग्नेर्नाशोपलब्धिः। वह्निभयमग्निभीतिं कुरुते।।

अथान्यत् -

**प्रासादभवनतोरणकेत्वादिष्वननलेन दग्धेषु।**

**तडिता वा षण्मासात् परचक्रस्यागमो नियमात्।।२०।।**

प्रासादो देवगृहम्। भवनं वेश्म। तोरणं प्रसिद्धम्। केतुर्ध्वजः। आदिग्रहणात् कोष्ठागारकुशूलादयः। एतेष्वननलेन विनाऽग्निना दग्धेषु। तडिता वा विद्युता वा दग्धेषु सत्सु-षण्मासात् षड्भिर्मासैः परतो नियमान्निश्चयात् परचक्रस्यान्यनृपसैन्यस्याऽऽगमो भवति।।

अथान्यते –

**धूमोऽनग्निसमुत्थो रजस्तमश्चाह्निजं महाभयदम्।**

**व्यभ्रे निश्युडुनाशो दर्शनमपि चाह्नि दोषकरम्।।२१।।**

अनग्निसमुत्थो धूमोा विनाग्निना यत्र धूमो दृश्यते। तथा अह्निजं दिनसम्भवं रजो धूलिस्तमोऽन्धकारश्च तन्महाभयदं महद्भयं ददाति। तथा च गर्गः- **बृ.सं.,पृ-५२३**

अनिशानि तमांसि स्युर्यदि वा पांशवो रजः।

धूमश्चानग्निना यत्र तत्र विन्द्यान्महद्भयम्।। इति।

व्यभ्रे निश्युडुनाशः। निशायां रात्रौ व्यभ्रे विगतमेघे उडूनां नक्षत्राणां नाशोऽदर्शना तथा सत्यादितये दिने नक्षत्राणां दर्शनम्। एतद्दोषकरम्। दोषान् करोति महाभयमित्यर्थः।।

अथान्यदाह-

**नगरचतुष्पादण्डजमनुजानां भयकरं ज्वलनमाहुः।**

**धूमाग्निविस्फुलिङ्गैः शप्याम्बरकेशगैर्मृत्युः।।२२।।**

नगराणां पुराणाम्। चतुष्पदानां गवादीनाम्। अण्डजानां पक्षिणाम्। मनुष्याणां मनुजानाम्। ज्वलनं सज्वालत्वं महाभयकरमित्याहुरुक्तवन्तो मुनयः। शय्या आस्तरणम्। अम्बरं वस्त्रम्। केशा मूर्धजाः। शय्याम्बरकेशगैर्धूमाग्निविस्फुलिङ्गैः, धूमः प्रसिद्धः। अग्निर्ज्वालारूपः, विस्फुलिङ्गाः अग्निकणाः, एतैर्दृष्टैस्तत्स्वामिनो मृत्युर्भवति। तथा च गर्गः- **बृ.सं.,पृ-५२३**

**शयनासनयानेषु केशप्रवारणेषु च।**

**दृश्यन्ते विस्फुलिङ्गा वा धूमो वा मरणाय तत्।। इति।।२२।।**

यथान्यत्-

**आयुधज्वलनसर्पणस्वनाः कोशनिर्गमनवेपनानि वा।**

**वैकृतानि यदि वायुधेऽपराण्याशु रौद्ररणसङ्कुलं वदेत्।।२३।।**

**मन्त्रैराग्नेयैः क्षीरवृक्षात् समिद्भिर्होतव्योऽग्निः सर्षपैः सर्पिषा च।**

**अग्न्यादीनां वैकृते शान्तिरेवं देयं चास्मिन् काञ्चनं ब्राह्मणेभ्यः।।२४।।**

राष्ट्रे यस्याग्निः प्रदीप्यते इत्यत आरभ्य ये उत्पाताः कथितास्ते अग्न्यादयः। तेषामग्न्यादीनां वैकृते विकारे आग्नेयैरग्निदैवत्यैर्मन्त्रैः क्षीरवृक्षादर्कादिकात्समिद्भिः। सर्षपैः सिद्धार्थकैः। सर्पिषा च घृतेनाग्निर्हुताशनो होतव्यः। एवमनेन प्रकारेण शान्तिः। अस्मिन्नुत्पाते ब्राह्मणेभ्यो विप्रेभ्यः काञ्चनं सुवर्णं दक्षिणार्थं देयम्।।

अथान्यानुत्पातानाह

**शाखाभङ्गेऽकस्माद्वृक्षाणां निर्दिशेद्रणोद्योगम्।**

**हसने देशभ्रंशं रुदिते च व्याधिबाहुल्यम्।।२५।।**

अकस्माद्वृक्षाणां शाखाभङ्गे शाखास्फोटने रणोद्योगं सङ्ग्राविभ्रमं निर्दिशेद्वदेत्। तथा वृक्षाणामेव हसने देशभ्रंश देशविनाशम्। रुदिते च रोदने वृक्षाणामेव व्याधिबाहुल्यं रोगप्राचुर्यम्।।

अथान्यदप्याह-

**राष्ट्रविभेदस्त्वनृतौ बालवधोऽतीव कुसुमिते बाले।**

**वृक्षात् क्षीरस्त्रावे सर्वद्रव्यक्षयो भवति।।२६।।**

वृक्षाणामनृतावृतुवर्जिते काले पुष्पफलोद्गमे सम्भवे राष्ट्रस्य विभेदो भवति। बाले बालवृक्षे अतीव कुसुमिते सजातपुष्पे बालानां शिशूनां वधो मरणम्। गर्गः- **बृ.सं.,पृ-५२५**

तथा वृक्षात् द्रुमात्क्षीरस्त्रावे दुग्धे स्त्रुते सर्वद्रव्याणां क्षयो विनाशो भवति।।

अन्यदप्याह-

**मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः।**

**स्नेहे दुर्भिक्षभयं महद्भयं निःस्त्रुते सलिले।।२७।।**

वृक्षान्मद्ये निःस्त्रुते निर्गते वाहनानामश्वादीनां नाशः क्षयः। शोणिते रक्ते निःस्त्रुते संग्रामो युद्धं भवति। मधुनि माक्षिके निःस्त्रुते रोगो भवति। स्नेहे तैलादिके निःस्त्रुते दुर्भिक्षभयं भवति। सलिले जले निःस्त्रुते महदतुलं भयं भवति।।

अन्यदप्याह-

**शुष्कविरोहे वीर्यान्नसंक्षयः शोषणे च विरुजानाम्।**

**पतितानामुत्थाने स्वयं भयं दैवजनितं च।।२८।।**

शुष्कविरोहे शुष्काणां नीरसानां वृक्षाणां विरोहे वीर्यान्नसंक्षय एव। पतितानां वृक्षाणां स्वयमात्मनैवोत्थाने ऊर्ध्वस्थितौ दैवजनितं दैवोत्पन्नं भयं भवति। चशब्दः समुच्चते।

अन्यदप्याह-

**पूजितवृक्षे ह्यनृतौ कुसुमफलं नृपवधाय निर्दिष्टम्।**

**धूमस्तस्मिन् ज्वालाऽथवा भवेन्नृपवधायैव।।२९।।**

पूजितवृक्षे प्रधानतरौ अनृतौ कुसुमफलं कुसुमानां फलानां चोद्गमो नृपस्य राज्ञो वधाय नाशाय निर्दिष्टं कथितम्। अथवा तस्मिन् वृक्षे धूमो ज्वाला अथवा भवेत्तदा नृपवधायैव राजमृत्यवे भवति।।२९।।

अन्यदप्याह-

**सर्पत्सु तरुषु जल्पत्सु वापि जनसंक्षयो विनिर्दिष्टः।**

**वृक्षाणां वैकृत्ये दशभिर्मासैः फलविपाकः।।३०।।**

तरुषु वृक्षेषु सर्पत्सु गच्छत्सु जल्पत्सु व्याहरत्सु वा जनानां लोकानां क्षयो विनाशो विनिर्दिष्ट कथितः। वृक्षाणां सर्वेषां वैकृत्ये विकारे दशभिर्मासैर्गतैः फलस्य विपाको भवति।

अत्र शान्तिमाह-

**पायसेन मधुनापि भोजयेद् ब्राह्मणान् घृतयुतेन भूपतिः।**

**मेदिनी निगदिनात्र दक्षिणा वैकृते तरुकृते हितार्थिभिः।।३१, ३२।।**

**नालेऽब्जयवादीनामेकस्मिन् द्वित्रिसम्भवो मरणम्।**

**कथयति तदधिपतीनां यमलं जातं कुसुमफलम्।।३३।।**

अब्जानि पद्मादीनि। यवाः प्रसिद्धाः। आदिग्रहणाद् गोधूमप्रियङ्गुधान्यानि। एतेषामन्यतमस्यैकस्मिन्नाले द्वित्रिसम्भवो द्वौ त्रयो वा भवन्ति, तदा तदधिपतीनां तेषां यवादीनामधिपतयः स्वामिनस्तेषां मरणं कथयत्यचष्टे। तथा यमलं द्विगुणितम्। द्विपुटादिवर्जं पद्मं कुसुमं पुष्पं फलं च जातम् तदा तदधिपतीनां मरणमेव कथयति।।

अन्यदप्याह-

**अतिवृद्धिः सस्यानां नानाफलकुसुमसम्भवो वृक्षे।**

**भवति हि यद्येकस्मिन् परचक्रस्यागमो नियमात्।।३४।।**

सस्यानामतीवात्यर्थं वृद्धिर्बाहुल्यम्। एकस्मिन् वृक्षे तरौ नानाविधानां बहुप्रकारणां फलानां कुसुमानां पुष्पाणां च सम्भव उत्पत्तिर्यद्येवं भवति, तदा नियमान्निश्चयात् परचक्रस्याऽऽगमो भवति।।

अन्यदप्याह-

**अर्धेन यदा तैलं भवति तिलानामतैलता वा स्यात्।**

**अन्नस्य च वैरस्यं तदा तु विन्द्याद् भयं सुमहत्।।३५।।**

**विकृतकुसुमं फलं वा ग्रामादथवा पुराद्बहिः कार्यम्।**

**सौम्योऽत्र चरुः कार्यो निर्वाप्यो वा पशुः शान्त्यै।।३६।।**

**सस्ये च दृष्ट्वा विकृतिं प्रदेयं तत्क्षेत्रमेव प्रथमं द्विजेभ्यः।**

**तस्यैव मधये चरुमत्र भौमं कृत्वा न दोषं समुपैति तज्जम्।।३७।।**

**दुर्भिक्षमनावृष्टावतिवृष्टौ क्षुद्भयं परभयं च।**

**रोगो ह्यनृतुभवायां नृपतिवधोऽनभ्रजातायाम्।।३८।।**

अनावृष्टौ दुर्भिक्षं भवति। अतिवृष्टावतिवर्षणे क्षुद्भयं दुर्भिक्षं परभयं च भवति। अनृतुभवायां वर्षाकालं वर्जयित्वा अन्यस्मिन्नृतौ वृष्टौ रोगो भवति। अनभ्रजातायां मेघं विनोत्पन्नायां वृष्टौ नृपतिवधो राज्ञो मरणं भवति।।

अथान्यानप्याह-

**शीतोष्णविपर्यासो नो सम्यगृतुषु च सम्प्रवृतेषु।**

**षण्मासाद्राष्ट्रभयं रोगभयं दैवजनितं च।।३९।।**

ऋतुषु शिशिरादिषु सम्यक् च न प्रवृत्तेषु। गणितदृष्टया न प्रवर्तितेषु शीतोष्णविपर्यासो व्यत्ययः। उष्णकाले शीतत्वं शीतकाले उष्णत्वम्। षण्मासादनन्तरं राष्ट्रभयं भवति। तथा दैवजनितं प्राक्कर्मार्जितं रोगभयं भवति।।

अन्यदप्याह-

**अन्यर्तौ सप्ताहं प्रबन्धवर्षे प्रधाननृपमरणम्।**

**रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः।।४०।।**

**धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विन्द्यात्।**

**अङ्गारपांशुवर्षे विनाशमायाति तन्नगरम्।।४१।।**

**उपला विना जलधरैर्विकृता वा प्राणिनो यदा वृष्टाः।**

**छिद्रं वाप्यतिवृष्टौ सस्यानामीतिसञ्जननम्।।४२।।**

विना जलदैर्मेघैरुपलाः पाषाणा वृष्टाः। अथवा विकृताः सविकाराः प्राणिनः, खरोष्ट्राऽ-श्वमार्जारश्रृगालप्रभृतयो वृष्टाः। अतिवृष्टौ वापि छिद्रं मध्ये कुत्रचिदवृष्टिरित्यर्थः। तच्च सस्यानामीति-सञ्जननमुपद्रवोत्पादकम्।।

अन्यानप्याह-

**यद्यमलेऽर्के छाया न दृश्यते प्रतीपा वा।**

**देशस्य तदा सुमहद्भयमायातं विनिर्देश्यम्।।४३।।**

अमले निर्मले अर्के सूर्ये सति यद्यि वृक्षादीनां छाया प्रतिविम्बं न दृश्यते , अथवा प्रतीपा विपर्ययस्था दृश्यते सूर्याभिमुखी, तदा देशस्य जनस्य सुमहदतिप्रभूतं भयमायातं प्राप्तं विनिर्देश्यं वक्तव्यमिति।।

अन्यदप्याह-

**व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथवा रात्रौ।**

**प्राच्यामपरस्यां वा तदा भवेत्क्षुद्भवं सुमहत्।।४४।।**

व्यभ्रे विगताभ्रे नभस्याकाश इन्द्रधनुरिन्द्रचापं तच्च दिवा दिवसे यदि दृश्यते , अथाव रात्रौ निशि दृश्यते। प्राच्यां पूर्वस्यां दिशि। अपरस्यां पश्चिमायां वा। तदा सुमहदतिप्रभुतं क्षुद्भयं दुर्भिक्षं भवति।।

अथैतेषामुत्पातानां शान्तिमाह-

**सूर्येन्दुपर्जन्यसमीरणानां यागः स्मृतो वृष्टिविकारकाले।**

**धान्यान्नगोकाञ्चनदक्षिणाश्च देयास्ततः शान्तिमुपैति पापम्।।४५।।**

सूर्य आदित्यः। इन्दुश्चन्द्रः। पर्जन्यो मेघः। समीरणो वायुः। एषां वृष्टिविकारकाले वर्षण- विकृतिसमये यागः स्मृत उक्तः। तथा धान्यानि शालयः। अन्नं भोज्यम् गावो धेनवः। काञ्चनं सुवर्णम्। एता दक्षिणा ब्राह्मणेभ्यो देयाः। ततोऽनन्तरं पापमनिष्टं शान्तिमुपैति गच्छति।।

अथान्यानुत्पातानाह-

**अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते।**

**शोषश्चाशोष्याणामन्येषां वा ह्रदादीनाम्।।४६।।**

**स्नेहासृङ्मांसवहाः सङ्कुलकलुषाः प्रतीपगाश्चापि।**

**परचक्रस्यागमनं नद्यः कथयन्ति षण्मासात्।।४७।।**

**ज्वालाधूमक्वाथारुदितोत्क्रुष्टानि चैव कूपानाम्।**

**गीतप्रजल्पितानि च जनमरकायोपदिष्टानि।।४८।।**

कूपानां ज्वालां प्रज्वलनम् धूमः, क्वाथः, फेनः, आरुदितम्, उत्क्रुष्टमुद्घोषितम् एतानि यदि भवन्तिः तथा गीतम् प्रजल्पितं व्याहरणमेतानि सर्वाणि जनानां लोकानां मरकाय मृत्यवे उपदिष्टान्युक्तानि।।

अन्यदप्याह-

**सलिलोत्पत्तिरखोते गन्धरसविपर्यये च तोयानाम्।**

**सलिलाशयविकृतौ वा महद्भयं तत्र शान्तिमिमाम्।।४९।।**

अखाते प्रदेशे सलिलस्य जलस्योत्पत्तिः सम्भवः। तोयानां जलानां गन्धरसविपर्यये। गन्धस्य सौगन्धस्य रसस्य स्वादुताया विपर्यये अन्यत्वे। सलिलाशयानामुदकाधाराणां विकृतौ विकारे स्वरूपान्यत्वे महदतीव भयं भवति। तत्र चेमां वक्ष्यमाणां शान्तिमहा।।

तां चाह-

**सलिलविकारे कुर्यात् पूजा वरुणस्य वारुणैर्मन्त्रैः।**

**तैरेव च जपहोमं शममेव पापमुपयाति।।५०।।**

सलिलविकारे जलविकृतौ वरुणस्यापाम्पतेर्वारुणैर्मन्त्रैः पूजामर्चां कुर्यात्, तैरेव वारुणै-र्मन्त्रैर्जपं होमं चाग्नौ कुर्यात्। एवमनेन प्रकारेण पापमनिष्टं शमं शान्तिमुपर्याति प्राप्नोति।।

**इति जलवैकृतम्।**

अथान्यानुत्पातानाह-

**प्रसवविकारे स्त्रीणां द्वित्रिचतुष्प्रभृतिसम्प्रसूतौ वा।**

**हीनातिरिक्तकाले च देशकुलसंक्षयो भवति।।५१।।**

स्त्रीणां योषितां प्रसवविकारे प्रसूतिविकृतौ। प्रसवविकारः श्वाद्यङ्गसादृश्यम्। अथवा द्वित्रिचतुष्प्र-भृतिसम्प्रसूतौ। द्वित्रिचतुष्पञ्चषटढसप्ताष्टनवदश वा जायन्ते। हीनातरिक्तकाले, हीने अपरिपूर्णे। अतिरिक्ते चाधिके प्रसवे देशसङ्क्षयो देशविनाशः।कुलसंक्षयो वंशविच्छेदश्च भवति।।

**वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे रणमरणमेषाम्।**

**षण्मासात् सतिफलं शान्तौ श्लोाकौ च गर्गोक्तौ।।५२।।**

वडवा अश्वतरी। उष्ट्रा करभः। महिषी। गौः। हस्तिनी करिणी। एतासु यमलोद्भवे द्वाभ्यां जनने एषामेवाश्वादीनां मरणं भवति। तथा च गर्गः। **बृ.सं.,पृ-५३२**

षण्मासादिति। सूतिफलं प्रसूतिफलं षण्मासात् परतो भवति। अत्र शान्तौ गर्गोक्तौ गर्गमहर्षिकथितौ श्लोकौ द्वाविमौ वक्ष्यमाणौ।।

एतौ चाह-

**नार्यः परस्य विषये त्यक्तव्यास्ता हितार्थिना।**

**तर्पयेच्च द्विजान् कामैः शान्ति चैवात्र कारयेत्।।५३।।**

**चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषू।**

**नगरं स्वामिनं यूथमन्यथा तु विनाशयेत्।।५४।।**

**परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम्।**

**उक्षाणाो वान्योन्यं पिबति श्वा वा सुरभिपुत्रम्।।५५।।**

**मासत्रयेण विन्द्यात्तस्मिन्निः संशयं परागमनम्।**

**तत्प्रतिघातायैतो श्लोकौ गर्गेण निर्दिष्टौ।।५६।।**

**त्यागो विवासनं दानं तत्तस्याशु शुभं भवेत्।**

**तर्पयेद् ब्राह्मणांश्चात्र जपहोमांश्च कारयेत्।। ५७।।**

**स्थालीपाकेन धातारं पशुना च पुरोहितः।**

**प्राजापत्येन मन्त्रेण यजेद्बह्वन्नदक्षिणम्।।५८।।**

त्यागस्त्यजनम्। विवासनमन्यत्र स्थानम्। दानमन्यस्य ब्राह्मणादेः प्रतिपादनं यत्तस्य चतुष्पदस्याशुं क्षिप्रमेव शुभं भवेत् स्यात्। अत्रास्मिन्नुपसर्गे ब्राह्मणान् द्विजांस्तर्पयेत् पूजयेत्। जपं मन्त्राणामद्भुतं होमानग्नौ च कारयेत्।

पुरोहितः स्थालीपाकेन चरुणा पशुना च छागादिनां धातारं प्रजापतिं प्राजापत्येन मन्त्रेण बह्वन्नं प्रभूतान्नं बहुदक्षिणं च यजेत्।।

अथान्यानप्युत्पातानाह-

**यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहयुतम्।**

**राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च।।५९।।**

यानमश्वादिकं वाहेन पुरुषेण वियुक्तं यदि गच्छेद् व्रजेत। वाहेन यतुं न व्रजेत। तदा राष्ट्रस्य भयं भवति। तथा चक्राणां स्थचक्राणां सादे मज्जने भङ्गे च स्फोटने राष्ट्रभयमेव भवति।।

अन्यानप्याह-

**गीतरवतूर्यशब्दा नभसि यदा वा चरस्थिरान्यत्वम्।**

**मृत्युस्तदा गदा वा विस्वरतूर्ये पराभिभवः।।६०।।**

**अनभिहततूर्यनादः शब्दो वा ताडितेषु यदि न स्यात्।**

**व्युत्पत्तौ वा तेषां परागमो नृपतिमरणं वा।।६१।।**

अनभिहतानामताडितानां तूर्याणां नादः शब्दो यदि वा ताडितेष्वाहतेषु शब्दो रवो न स्यान्न भवेत् ।तथा तूर्याणां व्युत्पतौ वा। विविधा उत्पत्तिर्व्युत्पत्तिर्नानाशब्दकृत्। परागमः परचक्र-स्यागमो भवति नृपते राज्ञो मरणं वा।।

अन्यदप्याह-

**गोलाङ्गलयोः सङ्गे दर्वीशूर्पाद्युपस्करविकारे।**

**क्रोष्टुकनादे च तथा शस्त्र भयं मुनिवचश्चेदम्।।६२।।**

**वायव्येष्वेषु नृपतिर्वायुं शक्तुभिरर्चयेत्।**

**आवायोरिति पञ्चर्चो जप्तव्याः प्रयतैर्द्विजैः।।६३।।**

**ब्राह्मणान् परमान्नेन दक्षिणाभिश्च तर्पयेत्।**

**बह्वन्नदक्षिणा होमाः कर्तव्याश्च प्रयत्नतः।।३४।।**

एषु वायव्येपूत्पातेषु नृपती राजा वायुमनिलं शक्तुभिरर्चयेत् पूजयेत् , तथा प्रयतैः संयतैर्द्विजैर्ब्राह्मणैरावायोरितयादिकाः पञ्चर्चो जप्तव्या इति। पञ्च ऋचो जप्तव्यो इति।

परमान्नेन पायसेन दक्षिणाभिश्च ब्राह्मणांस्तर्पयेत् तथा होमा बह्वन्नदक्षिणाः प्रभूतभोज्याः प्रभूतदक्षिणाः प्रयत्नतश्च कर्तव्या इति।।

अथान्यानप्युत्पातानाह-

**पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरम्।**

**नक्तं वा दिसचराः क्षपाचरा वा चरन्त्यहनि।।६५।।**

**सन्ध्योद्वयेऽपि मण्डलमाबध्नन्तो मृगा विहङ्गा वा।**

**दीप्तायां दिश्यथवा क्रोशन्तः संहता भयदाः।।६६।।**

पुरपक्षिणो ग्राम्यविहगा यदि वनचरा भवन्ति। वनेऽरण्ये चरन्ति, तथा वन्याः पक्षिणो निर्भया विगतभीतयो वा पुरं नगरं प्रविशन्ति। अथवा दिवसचराः पक्षिणः काकादयो नक्तं रात्रौ चरन्ति। क्षपाचरा रात्रिचारिणः कौशिकादयोऽहनि दिवसे चरन्ति।

अन्यानप्याह- मृगा अरण्यप्राणिनः विहङ्गा पक्षिणो वा सन्ध्याद्वयेऽपि सूर्योदयास्त समययोर्मण्डलं चक्राकारमाबध्नन्तो रचयन्तः अथवा संहताः समेता बहवोऽतीव क्रोशन्तो

वाच्यमाना दृश्यन्ते। दीप्तायां दिशि तत्कालं रवेर्वने या दीप्ता तस्याम्। तदा भयदा इति। यस्यां रविस्तिष्ठति सा दीप्तेति तल्लक्षणम्।।

अन्यानप्याह-

**श्येनाः प्ररुदन्त इव द्वारे क्रोशन्ति जम्बुका दीप्ताः।**

**प्रविशेन्नरेन्द्रभवने कपोतकः कौशिको यदि वा।।६७।।**

श्येनाः प्राचिकाः पक्षिणः प्रकर्षेण रुदन्तो रोदमाना इव भवन्ति तथा जम्बुकाः श्रृगाला दीप्ताः सूर्याभिमुखाः क्रूरशब्दाश्च द्वारे पुरद्वारे क्रोशन्ति शब्दं कुर्वते, नरेन्द्रभवने राजगृहे, कपोतकः पक्षी कौशिक उलूको यदि वा प्रविशेत्। तथा च गर्गः- **बृ.सं.,पृ-५३७**

अथान्यानृत्पातानाह-

**कुक्कुटरुतं प्रदोषे हेमन्तादौ च कोकिलालापाः।**

**प्रतिलोममण्डलचराः श्येनाद्याश्चाम्बरे भयदाः।।६८।।**

**गृहचैत्यतोरणेषु द्वारेषु च पक्षिसङ्घसम्पातः।**

**मधुवल्मीकाम्भोरुहसमुद्भवश्चापि नाशाय।।६९।।**

**श्वभिरस्थिशवावयवप्रवेशनं मन्दिरेषु मरकाय।**

**पशुशस्त्रव्याहारे नृपमृत्युर्मुनिवचश्चेदम्।।७०।।**

श्वभिः सारमेयैर्मन्दिरेषु गृहेष्वस्थिशवावयवानां प्रवेशनम्। अस्थ्नः शवावयवस्य मृतपुरुषाङ्गस्य प्रवेशनं मरकाय भवति। पशूनां च चतुष्पदानां शस्त्राणां च व्याहारे पुंवत्सम्भाषमाणे नृपस्य राज्ञो मृत्युर्मरणं भवति। इदं च वक्ष्यमाणां शान्त्यर्थं मुनिवयः ऋषिवाक्यम्।।

तच्चाह-

**मृगपक्षिविकारेषु कुर्याद्धीमान् सदक्षिणान्।**

**देवाः कपोत इति च जप्तव्याः पञ्चभिर्द्विजैः।।७१।।**

**सुदेवा इति चैकेन देया गावः सदक्षिणाः।**

**जपेच्छाकुनसूक्तं वा मनो वेदशिरांसि च।।७२।।**

**शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभङ्गेषु।**

**तद्वत्कपाटतोरणकेतूनां नरपतेर्मरणम्।।७३।।**

शक्रध्वज इन्द्रध्वजः। इन्द्रकीलो द्वारार्गलः। स्तम्भद्वारे प्रसिद्धे। एषामन्यतमस्य प्रतातः पतनं भङ्गः स्फोटनं वा तेषु दृष्टेषे। कपाटं द्वारापिधानम्। तोरणं प्रसिद्धम्। केतुर्ध्वजः। एतेषामपि तद्वत्प्रपातो भङ्गो दृश्यते, तदा नरपते राज्ञो मरणं विनिर्दिशेद्वदेत्।।

अन्यानप्याह-

**सन्ध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च काननेऽनग्नौ।**

**छिद्राभावे भूमेर्दरणं कम्पश्च भयकारी।।७४।।**

सन्ध्याद्वयस्य सूर्योदयास्तमययोर्दीप्तिस्तेजः। कानने वने चानग्नौ अग्निरहितो धूमोत्पत्ति-धूमसम्भवः तथा छिद्राभावे व्रणं विना भूमेरवनेर्दरणं स्फोटनं कम्पश्चलनं च भयकारी भयं करोति।।७४।।

**पाखण्डानां नास्तिकानां च भक्तः साध्वाचारप्रोज्झितः क्रोधशीलः।**

**ईर्ष्युः क्रूरो विग्रहासक्तचेता यस्मिन् राजा तस्य देशस्य नाशः।।७५।।**

**प्रहर हर छिन्धि भिन्धीत्यायुधकाष्ठाश्मपाणयो बालाः।**

**निगदन्तः प्रहरन्ते तत्रापि भयं भवत्याशु।।७६।।**

बालाः शिशवः। आयुधकाष्ठाश्मपाणयः आयुधानि खड्गादीनि कृत्रिमरूपाणि, काष्ठानि लगुडानि , अश्मनः पाषाणाः पाणिषु हस्तेषु येषां ते तथाभूताः , प्रहर हर छिन्धि भिन्धि इति निगदन्तः प्रवदन्तः परस्परमन्योन्यं प्रहरन्ते ध्नन्ति यत्र तत्राप्याशु क्षिप्रमेव भयं भवति। तथा च पराशरः- **बृ.सं.,पृ-५४०**

अन्यानप्याह-

**अङ्गारगैरिकाद्यैर्विकृतप्रेताभिलेखनं यस्मिन्।**

**नायकचित्रितमथवा क्षये क्षयं याति न चिरेण।।७७।।**

यस्मिन क्षये गृहं अङ्गारगैरिकाद्यैर्विदग्धकोष्ठेन गैरिकेन वा। आदिग्रहणादन्यैः पीतनीलै रङ्गैर्विकृतानां विरूपाणां प्रेतानां मृतपुरुषाणां चाभिलेखनमालेखनम् अथवा नायको गृहस्वामी अङ्गारगैरिकाद्यैश्चित्रित आलेखितोऽपि कृतो यत्र दृश्यते गृहे तद्गृहं न चिरेण शीघ्रमेव क्षयं नाशं याति।।

अन्यानप्याह-

**लूतापटाङ्गशबलं न सन्ध्ययोः पूजितं कलहयुक्तम्।**

**नित्योच्छिष्टंस्त्रीकं च यद् गृहं तत्क्षयं याति।।७८।।**

**दृष्टेषु यातुधानेषु निर्दिशेन्मरकमाशु सम्प्राप्तम्।**

**प्रतिघातायैतेषां गर्गः शान्तिं चकारेमाम्।।७९।।**

यातुधानेषु यक्षेषु प्रत्यक्षमवलोकितेषु आशु क्षिप्रमेव मकरं सम्प्राप्तं निकटवर्तिनं निर्दिशेद्वदेत्। एतेषामुत्पातानां प्रतिधाताय नाशायेमां वक्ष्यमाणां शान्तिं गर्गश्चकारं कृतवान्।

तां चाह-

**महाशान्त्योऽथ बलयो भोज्यानि सुमहान्ति च।**

**कारयेत महेन्द्रं च माहेन्द्रीं च समर्चयेत्।।८०।।**

महाशान्त्यो महत्योऽतिप्रभूताः शान्त्यः। अथ बलयमुपहाराः तथा समुहान्त्यपि प्रभूतानि भोज्यानि च कारयेत्। महेन्द्रमिन्द्रं च कारयेत। माहेन्द्रीमिन्द्राणीं च समर्चयेत् पूजयेत्।।८०।।

**इति शक्रध्वजेन्द्रकीलादिवैकृतम्**

अथ तत्र कालेषूत्पाता दृष्टा विफला भवन्ति तानाह-

**नरपतिदेशविनाशे केतोरुदयेऽथवा ग्रहेऽर्केन्द्वोः।**

**उत्पातानां प्रभवः स्वर्तुभवश्चाप्यदोषाय।।८१।।**

**ये च न दोषान् जनयन्त्युत्पातानुतुस्वभावकृतान्।**

**ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः।।८२।।**

ये चोत्पाता ऋतुस्वभावकृता ऋतुस्वभावेनोत्पद्यन्ते दोषाननिष्टफलं न जनयन्ति नोत्पादयन्ति। तानृतुस्वभावकृतानृषित्रकृतैः ऋषिपुत्रो नामाचार्यस्तत्कृतैः श्लोकैरमैः समासोक्तैः समासेन सङ्क्षेपेण य उक्तास्तैर्विधाज्जानीयात्।।

तत्र वसन्ते प्राकृतानुत्पातानाह-

**वज्राशनिमहीकम्पसन्ध्यानिर्धातानि : स्वनाः।**

**परिवेषरजोधूमरक्तार्कास्तमयोदयाः।।८३।।**

**द्रुमेभ्योऽन्नरसस्नेहबहुलपुष्पफलोद्गमाः।**

**गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे।।८४।।**

एत उत्पाता मधौ माधवे च वैशाखे मासि शिवाय श्रेयसे भवन्ति। के तानित्याह- वज्राशनीत्यादि। वज्रं विद्युत, अशनिरश्मवर्षणमुल्काभेदो वा। महीकम्पो भूकम्पः। सन्ध्या प्रसिद्धा दीप्ता। यतस्तस्या लक्षणमुक्तम्। निर्धातनिः स्वना निर्घातशब्दाः अथवा निर्घाताः केवला, निःस्वनाश्च शब्दा यथा तथोच्चरिताः। परिवेषः सूर्याचन्द्रमसोः। रजो धूलिर्नभसि। धूमः काननेषु। तथा रक्तस्य लोहितवर्णस्यार्कस्य सूर्यस्यास्तमयोदयौ।

द्रुमेभ्यो वृक्षेभ्योऽन्नस्य भोजनस्य। रसानां मधुरादीनाम्। स्नेहस्य तैलादेः। बहूनां पुष्पाणां फलानां चोद्गमः सम्भवः। गवां धेनूनां पक्षिणां च मदवृद्धिः कामानुसेवनम्।।

अथ ग्रष्मे आह-

**तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्।**
**अनग्निज्वलनस्फोटकधूमरेण्वनिलाहतम्।।८५।।**
**रक्तपद्मारुणा सन्ध्या नभः क्षुब्धार्णवोपमम्।**
**सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं वदेत्।।८६।।**

**शक्रायुधपरीवेषविद्युच्छुष्कविरोहणम्।**
**कम्पोद्वर्तनवैकृत्यं रसनं दरणं क्षितेः।।८७।।**
**सरोनद्युदपानानां वृद्धयूर्ध्वतरणप्लवाः।**
**सरणं चादिगेहानां वर्षासु च भयावहम्।।८८।।**

वर्षास्वेतन्न भयावहं न भयप्रदम्। शुभमित्यर्थः। शक्रायुधमिन्द्रचापम्। परिवेषः। सूर्याचन्द्रमसोः। विद्युत्तडित्। शुष्कविरोहणं शुष्काणां तरूणां पुनर्विरोहणं सरसत्वम्। क्षितेर्भूमेः कम्पश्चलनम्। उद्वर्त्तनं परिवर्त्तनम्। वैकृत्यं विकृतता विकारः स्वरूपान्यत्वम्। क्षितेर्भूमे रसनं शब्दः श्लेषणं वा। दरणं निःसरणं स्फोटनमित्यर्थः।

सरोनद्युदपानानां यथाक्रमं वृद्धयुधर्वतरणप्लवाः सरसां वृद्धिर्वर्द्धनम्। नदीनामूर्ध्वतरण-मूर्ध्वगमनम् उदपानानां वापीकूपतडागानां प्लवो जलप्लवः। अद्रीणां पर्वतानां गेहानां गृहणां सरणै लुण्ठनमिति ।।

अथ शरद्याह-

**दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम्।**
**ग्रहनक्षत्रताराणां दर्शनं च दिवाऽम्बरे।।८९।।**

गीतवादित्रनिर्घोषा वनपर्वतसानुषु।
सस्यवृद्धिरपां हानिरपायाः शरदि स्मृताः।।९०।।
शीतानिलतुषारत्वं नर्दनं मृगपक्षिणाम्।
रक्षोयक्षादिसत्त्वानां दर्शनं वागमानुषी।।९१।।
दिशो धूमान्धकाराश्च सनभोवनपर्वताः।
उच्चैः सूर्योदयास्तौ च हेमन्ते शोभनाः स्मृताः।।९२।।
हिमतापानिलोत्पाता विरूपाद्भुतदर्शनम्।
कृष्णाञ्चनाभमाकाशं तारोल्कापातपिञ्चरम्।।९३।।
चित्रगर्भोद्भवाः स्त्रीषु गोऽजाश्वमृगपक्षिषु।
पत्राङ्कुरलतानां च विकाराः शिरि शुभाः।।९४।।

एत उत्पाताः शिशिरे शुभा इष्टफलदाः। हिमस्य तुहिनस्य पातः पतनम्। अनिलोत्पाता वाय्वपस्पर्शाः। विरूपाणां भीषणीयानां सत्त्वानामद्भुतानामाश्चर्योत्पादकानां च दर्शनम्। दिव्यपुरुषादीनाम्। आकाशं नभः कृष्णाञ्जनाभम् कृष्णाञ्जनवदाभा कान्तिर्यस्य। तारापातै-रुल्कापातैः पिञ्जरं चित्रितम्।

स्त्रीषु योषित्सु चित्रा नानाप्रकाराः श्वाद्यङ्गसदृशाः गर्भोद्भवाः गर्भाणां सम्भवाः तथा गोषु, अजेषु छागेषु, अश्वेषु तुरगेषु, मृगेषु, पक्षिषु च विचित्रगर्भोद्भवाः। गोऽजाश्वानां मृगपक्षिणां प्रकृतेर्विपर्यासः। पत्राणां पर्णानामङ्कुराणां लतानां विकारा विकृतय इति।।

अत्रैव विशेषमाह-

ऋतुस्वभावजा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते चातिदारुणाः।।९५।।

एते यथोक्ता उत्पाता ऋतुस्वभावेन जायन्ते उत्पद्यन्ते स्वर्तावात्मीयर्तौ दृष्टा अवलोकिताः शुभप्रदा भवन्ति। ऋतोरन्यत्राऽस्मिन् काले दृष्टास्त उत्पाताश्चातिदारुणा अतिकष्टफला भवन्ति।।

यद्यद्विशेषफलप्रदं भवति तत्तदाह-

उन्मत्तानां च या गाथाः शिशूनां यच्च भाषितम्।
स्त्रियो यच्च प्रभाषन्ते तस्य नास्ति व्यतिक्रमः।।९६।।

उन्मत्तानां विचित्राणां या गायाः प्राकृतकाव्यम्। शिशूनां बालानां यच्च भाषितं व्याहृतम्, यच्च स्त्रियो योषितः प्रभाषन्ते व्याहरन्ति। तस्य व्यतिक्रमोऽन्यथात्वं नास्ति न विद्यते। सर्वथा तद्भवतीत्यर्थः। येन कारणेनैतत्सयरूपं भवति।।

तत्प्रदर्शनार्थमाह-

**पूर्वं चरति देवेषु पश्चाच्चरति मानुषान्।**

**नाचोदिता वाग्वदति सत्या ह्येषा सरस्वती।।९७।।**

एषा भगवती सरस्वती सत्या सत्यरूपा अचोदिता अप्रेरिता न वदति न ब्रवीति। यतः प्रथमं पूर्व देवेषु चरति देवलोकं याति। देवप्रेरिता पश्चादनन्तरं मानुषान् गच्छति।।

अथोत्पातशास्त्रज्ञस्य प्रभावमाह-

**उत्पातानां गणितविवर्जितोऽपि बुद्ध्वा विख्यातो भवति नरेन्द्रवल्लभश्च।**

**एतत्तन्मुनिवचनं रहस्यमुक्तं यज्ज्ञात्वा भवति नरस्त्रिकालदर्शी।।९८।।**

गणितविवर्जितो ग्रहगणितरहितोऽप्युत्पातान् बुद्ध्वा ज्ञात्वा विख्यातः कीर्तियुक्तो नरेन्द्रवल्लभो नृपप्रियश्च भवति। एतत्तद्रहस्यं परमार्थं मुनिवचनमृषिवाक्यमुक्तं कथितम्। यज्ज्ञात्वा बुद्ध्वा नरः पुरुषस्त्रिकालदर्शी त्रिकालं पश्यति। अतीतानागतवर्तमानकालज्ञो भवतीत्यर्थः।।

## ८. मयूरचित्रकालाध्यायः

तत्रादावेव तत्प्रदर्शनार्थमाह-

**दिव्यान्तरिक्षाश्रयमुक्तमादौ मया फलं शस्तमशोभनं च।**

**प्रायेण चारेषु समागमेषु युद्धेषु मार्गादिषु विसतरेण।।१ ।।**

**भूयो वराहमिहिरस्य न युक्तमेतत् कर्तुं समासकृदसाविति तस्य दोषः।**

**तज्ज्ञैर्न वाच्यमिदमुक्तफलानुगीति यद्वर्हिचित्रकमिति प्रथितं वराङ्गम्।।२ ।।**

**स्वरूपमेव तस्य तत्प्रकीर्तितानुकीर्तनम्।**

**ब्रवीम्यहं न चेदिदं तथाऽपि मेऽत्र वाच्यता।।३ ।।**

**उत्तरवीथिगता द्युतिमन्तः क्षेमसुभिक्षशिवाय समस्ताः।**

**दक्षिणमार्गगता द्युतिहीनाः क्षुद्भयतस्करमृत्युकरास्ते।।४ ।।**

उत्तरवीथयो नागगजैरावताः तासु सर्व एव भौमादयस्ताराग्रहा गता ये च द्यूतिमन्तस्ते-जस्विनः क्षेमसुभिक्षशिवाय भवन्ति। तथा त एव ग्रहा दक्षिणमार्गगता मृगाजदहनाख्यासु वीथिषु स्थिताः। द्युतिहीनाः कान्तिरहिता। क्षुद्भयतस्करमृत्युकराः क्षुद्भयं दुर्भिक्षम्, तस्करांश्चौरान् मृत्युं मरणं च कुर्वन्ति। अर्थादेव मध्यवीथिषु गता मध्यफलाः। तथा च गर्गः- **बृ.सं.,पृ-५४८**

अन्यदप्याह-

**कोष्ठागारगते भृगुपुत्रे पुष्यस्थे च गिराम्प्रभविष्णौ।**

**निर्वैराः क्षितिपाः सुखभाजः संहृष्टाश्च जना गतरोगाः।।५ ।।**

कोष्ठागारं मघा तत्र गते तत्रस्थे भृगुपुत्रे शुक्रे गिराम्प्रभविष्णौ वाचां स्वामिनि बृहस्पतौ पुष्पस्थे च क्षितिपा राजानो निर्वैरा विगतद्वेषाः सुखभाजश्च भवन्ति। तथा जना लोकाः संहृष्टाः प्रमुदिता गतरोगाः स्वस्थदेहाश्च भवन्ति। तथा च गर्गः- **बृ.सं.,पृ-५४८**

अन्यदप्याह-

**पीड्यन्ति यदि कृत्तिकां मघां रोहिणीं श्रवणमैन्द्रमेव वा।**

**प्रोज्झ्य सूर्यमपरे ग्रहास्तदा पश्चिमा दिगनयेन पीडयते।।६ ।।**

सूर्यमादित्यं प्रोज्झ्य वर्जयित्वा अपरे सर्वे चन्द्रादयो ग्रहा यदा कृत्तिका, मघा, रोहिणी, श्रवणम्, ऐन्द्रं ज्येष्ठा, एतानि नक्षत्राणि पीडयन्ति दक्षिणमार्गगमनेन योगतारकाच्छादनेन भेदनने वा। तदा पश्चिमा दिग् अपराशा अनयेनानीतया पीडयते। तथा च गर्गेणोच्यते-

अन्यदप्याह-

**प्राच्यां चेद् ध्वजवदवस्थिता दिनान्ते प्राच्यानां भवति हि विग्रहो नृपाणाम्।**

**मध्ये चेद् भवति हि मध्यदेशपीडा रूक्षैस्तैर्न तु रुचिमन्मयूखवद्भिः।।७।।**

**दक्षिणां ककुभमाश्रितस्तु तैर्दक्षिणापथपयोमुचां क्षयः।**

**हनिरूक्षतनुभिश्च विग्रहः स्थूलदेहकिरणान्वितैः शुभम्।।८।।**

तैर्ग्रहैर्दक्षिणां ककुभं याम्यां दिशमाश्रितैर्दक्षिणापथपयोमुचां दक्षिणस्यां दिशि पयोमुचां मेघानां क्षयो विनाशो भवति। तथा तैरेव दक्षिणां ककुभमाश्रितैर्हीनरूक्षतनुभिः, हीना अल्पाा रूक्षा कलुषा तनुः शरीरं येषां तैस्तथाभूतैविग्रहैस्तैरेव स्थूलदेहैर्बुहद्बिम्बैः किरणान्विते रश्मिवद्भिः शुभं तत्रैव वाच्यम्।

अन्यदप्याह-

**उत्तरमार्गे स्पष्टमयूखाः शान्तिकारस्ते तन्नृपतीनाम्।**

**ह्रस्वशरीरा भस्मसवर्णा दोषकराः स्युर्देशनृपाणाम्।।९।।**

त एव ग्रहा उत्तरमार्गे उत्तरस्यां दिशि उत्तरवीथिषु व्यवस्थिताः स्पष्टमयूखा विपुल-रश्मयः। तन्नृपतीनामुत्तरपथराजानां शान्तिकराः शिवप्रदाः। तथा त एव ग्रहा ह्रस्वशरीराः स्वल्पविम्बा भस्मवर्णा विगतकान्तयः कलुषाश्च तद्देशनृपाणामृत्तरपथराजानां दोषकराः। तथा च गर्गः- **बृ.सं.,पृ-५५०**

अन्यदप्याह-

**नक्षत्राणां तारकाः सग्रहाणां धूमज्वालाविस्फुलिङ्गान्विताश्चेत्।**

**आलोकं वा निर्मिमित्तं न यान्ति याति ध्वंसं सर्वलोकः सभूपः।।१०।।**

**दिवि भाति यदा तुहिनांशुयुगं द्विजवृद्धिरतीव तदाशु शुभा।**

**तदनन्तरवर्णरणोऽर्कयुगे जगतः प्रलयस्त्रिचतुष्प्रभृति।।११।।**

दिव्याकाशे यदा यस्मिन् काले तुहिनांशुयुंगं चन्द्रयुग्मं भाति दृश्यते, तदा तस्मिन् काले आशु क्षिप्रं शुभा शोभना अतीवात्यर्थं द्विजानां ब्राह्मणानां वृद्धिर्भवति। तथा अर्कयुगे सूर्ययुग्मे दृष्टे तदनन्तरवर्णस्य ब्राह्मणात् परस्य क्षत्रियाख्यस्य रणः संग्रामो भवति। तथा त्रिषु चतुर्षु पञ्चसु वा सूर्येषु दृष्टेषु जगतो जनस्य प्रलयः संहार इति। गर्गः- **बृ.सं.,पृ-५५१**

अन्यदप्याह-

**मुनीनभिजितं ध्रुवं मघवतश्च भं संस्पृशन्।**

**शिखी घनविनाशकृत् कुशलकर्महा शोकदः।**

**भुजङ्गमथ संस्पृशेद् भवति वृष्टिनाशो ध्रुवं**

**क्षयं व्रजति विद्रुतो जनपदश्च बालाकुलः।।१२।।**

**प्राग्द्वारेषु चरन् रविपुत्रो नक्षत्रेषु करोति च वक्रमढ।**

**दुर्भिक्षं कुरुते महदुग्रं मित्राणां च विरोधमवृष्टिम्।।१३।।**

**रोहिणीशकटमर्कनन्दनो यदि भिनित्ति रुधिरोऽथवा शिखी।**

**किं वदामि यदनिष्टसागरे जगदेशषमुपयाति संक्षयम्।।१४।।**

अर्कनन्दनः सौरो यदि रोहिणीशकटं भिनत्ति विदारयति रुधिरोऽङ्गारको वा शिखी केतुरथवा, तदा अनिष्टसागरे अनिष्टसमुद्रे अशेषं सर्वं जगद्विश्वं संक्षयं विनाशं याति। किमन्यदपरं वदामि कथयामि यदनिष्टं न भवति। तथा च गर्गः- **बृ.सं.,पृ-५५२**

अन्यदप्याह-

**उदयति सततं यदा शिखी चरति भचक्रमशेषमेव वा।**

**अनुभवति पुराकृतं तदा फलमशुभं सचराचरं जगत्।।१५।।**

शिखी केतुर्यदा सततं सर्वकालमुद्यति दर्शनं गच्छति, अशेषं समग्र ं भचक्रं नक्षत्र-मण्डलमेव वा चरति विचरति, तदा सचराचरं जङ्गमस्थावराख्यं जगद्विश्वं पुराकृतमन्य-जन्मार्जितं फलमशुभमनिष्ट-मनुभवत्युपभुंक्ते इत्यर्थः।।

अधुना चन्द्रचारोक्तफलमाह-

**धनुः स्थायी रूक्षो रुधिरसदृशः क्षुद्भयकरो**

**बलोद्योगं चन्द्रः कथयति जयं ज्याऽस्य च यतः।**

**गवां श्रृङ्गो गोध्नो निधनमपि सस्यस्य कुरुते**

**ज्वलन् धूमायन् वा नृपतिमरणायैव भवति।।१६।।**

**स्निग्धः स्थूलः समश्रृङ्गो विशालस्तुङ्गश्चोदग्विचरन्नगवीथ्याम्।**

**दृष्टः सौम्यैरशुभैर्विप्रयुक्तो लोकानन्दं कुरुतेऽतीव चन्द्रः।।१७।।**

पित्र्यमैत्रपुरुहूतविशाखात्वाष्ट्रमेत्य च युनक्ति शशाङ्कः।

दक्षिणेन न शुभः शुभकृत्स्याद्यद्युदक्चरति मध्यगतो वा।।१८।।

परिध इति मेघरेखा या तिर्यग्भास्करोदयेऽस्ते वा।

परिधिस्तु प्रतिसूर्यो दण्डस्त्वृजुरिन्द्रचापनिभः।।१९।।

उदयेऽस्ते वा भानोर्ये दीर्धा रश्मयस्त्वमोघास्ते।

सुरचापखण्डमृजु यद्रोहितमैरावतं दीर्धम्।।२०।।

भास्करस्यादित्योदये अस्तमये वा तिर्यग् या स्थिता मेघरेखा भवति, स परिध इति परिघसंज्ञः। तथा प्रतिसूर्यः परिधिसंज्ञः। इन्द्रचापनिभः शक्रधनुः सदृशः ऋृजुः स्पष्टो दण्डसंज्ञः।

उदयेऽस्ते वेति। भानोरादित्यस्योदयेऽस्तमये वा ये दीर्धा आयामिनो रश्मयः किरणास्ते त्वमोघाख्या अमोघसंज्ञाः। सुरचापखण्डमिन्द्रधनुः खण्डं यदृजु स्पष्टं तद्रोहितसंज्ञम्। तदेव यदि दीर्घं भवति तदैरावतसंज्ञं ज्ञेयम्।।

अथ सन्ध्यालक्षणमाह-

अर्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्।

तेजः परिहानिमुखाद्भानोरर्धोदयो यावत्।।२१।।

तस्मिन् सन्ध्याकाले चिह्नैरेतैः शुभाशुभं वाच्यम्।

सर्वैरेतैः स्निग्धैः स्द्यो वर्षं भयं रूक्षैः।।२२।।

भानोरादित्यस्यार्धास्तमयादारभ्य यावत्तारका नभसि न व्यक्तीभूता न परिस्फुटाः, तावदपरा सन्ध्या। तथा तारकाणां तेजः परिहानिमुखाद्दीप्तिनिवृत्तेरारभ्य यावद् भानोरर्कस्या-र्धोरदयस्तावत् पूर्वा सन्ध्या।

तस्मिन् यथोद्दिष्टै सन्ध्यासमये एतैः प्रागुक्तैश्चिह्नैर्वक्ष्यमाणैश्च शुभाशुभं फलं वाच्यं वक्तव्यम्। एतैस्तथा वक्ष्यमाणैश्च चिह्नैः, सर्वैः, स्निग्धैः सस्नेहैः सद्यस्तस्मिन्नहनि वर्षं ज्ञेयम्। तस्मिन्नेवाहनि वर्षति। तैरेव रूक्षैः सद्यो भयमिति।।

अथ वृष्टिज्ञानमाह-

अच्छिन्नः परिधो वियच्च विमलं श्यामा मयूखा रवेः

स्निग्धा दीधितयः मितं सुरधनुर्विद्युच्च पूर्वोत्तरा।

स्निग्धो मेघतरुर्दिवाकरकरैरालिङ्गितो वा यदा।

वृष्टिः स्याद्यदि वाऽर्कमस्तसमये मेघो महान् छादयेत्।।२३।।

**खण्डो वक्रः कृष्णो ह्रस्वः काकाद्यैर्वा चिह्नैर्विद्धः।**

**यस्मिन् देशे रूक्षश्चार्कस्तत्राभावः प्रायो राज्ञः।।२४।।**

अर्क आदित्यो यस्मिन देशे खण्डोऽसकलः। वक्रः कुटिलो दीर्घश्च। कृष्णोऽसिवतर्णः। ह्रस्वः स्वल्पविम्बः। अथवा काकाद्यैश्चिह्नैर्विद्धः। आदिग्रहणाद् ध्वांक्षकबन्धप्रहरणा ग्रहीतव्याः। तैर्विद्धः। तथा रूक्षो न निर्मलः। एवंविधो दृश्यते। तस्मिन् देशे यो राजा तस्य राज्ञः प्रायो बाहुल्येनाभावो विनाश इत्यर्थः। तथा च गर्गः- **बृ.सं.,पृ-५५५**

अथ युद्धकाले जयपराजयज्ञानमाह-

**वाहिनीं समुपयाति पृष्ठतो मांसभुक्त खगगणो युयुत्सतः।**

**यस्य यस्य बलविद्रवो महानग्रगैस्तु विजयो विहङ्गमैः।।२५।।**

**भानोरुदये यदि वास्तमये गन्धर्वपुरप्रतिमा ध्वजिनी।**

**विम्बं निरुणद्धि तदा नृपतेः प्राप्तं समरं सभयं प्रवदेत्।।२६।।**

भानोरादित्यस्योदये अस्तमये वा यदि गन्धर्वपुरप्रतिमा गन्धर्वनगरतुल्या ध्वजिनी सेना यदा विम्बं मण्डलं निरुणद्धि छादयति, तदा नृपते राज्ञः समरं संग्रामं सभयं भयसहितं प्राप्तमायातमिति प्रवदेद् ब्रूयात्। तथा च गर्गः- **बृ.सं.,पृ-५५६**

अथ सन्ध्यालक्षणमाह-

**शस्ता शान्ताद्विजमृगघुष्टा सन्ध्या स्निग्धा मृदुपवना च।**

**पांशुध्वस्ता जनपदनाशं घत्ते रूक्षा रुधिरनिभा वा।।२७।।**

**यद्विस्तरेण कथितं मुनिभिस्तदस्मिन् सर्वं मया निगदितं पुनरुक्तवर्जम्।**

**श्रुत्वाऽपि कोकिलरुतं बलिभुग्विरौति यत्तत् स्वभावकृतमस्य पिंक न जेतुम्।।२८।।**

मुनिभिर्गगादिभिर्यन्मयूरचित्रकं विस्तरेण व्यासेन कथितमुक्तं तत्सर्वमस्मिन् मयूरचित्रके मया पुनरुक्तवर्जं निगदितमुक्तम्। आदौ तावन्मयूरचित्रकं पुनरुक्त् तत्रापि मुनिभिः पुनरुक्तं कृतं तन्मया नोक्तम्। यद्यप्येवं तथापि कोकिलस्य परभृतस्य रुतं शब्दितं श्रुत्वा आकर्ण्य बलिभुक्कास्तदनुसारेण विरौति यत्तदस्य काकस्य स्वभावकृतं प्राकृतं प्रकृतिभवमेवायाति, न पिकं कोकिलं जेतुं शक्नोति। अनेनात्मनः पेशलत्वं प्रदर्शितं भवति।

## ९. पुष्यस्नानाध्यायः

तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

**मूलं मनुजाधिपतिः प्रजातरोस्तदुपघातसंस्कारात्।**
**अशुभं शुभं च लोके भवति यतोऽतो नृपतिचिन्ता।।१।।**

प्रजातरोः प्रजावृक्षस्य मनुजाधिपतिः राजा मूलं यथा वृक्षस्य शाखिनो मूलवर्धने वृद्धिः सर्वत्रावयवेषु भवति। एवं राजनि विवृद्धे प्रजाः सुस्थिताः। तदुपघातात्तस्य प्रजातरोर्मूलविघा-ताद्विनाशो जनपदस्यानिष्टशुभं भवति। तत्संस्काराच्छुभमिष्टं भवति। वृक्षवद्यतो यस्माद-तोऽस्माद्धेतोर्नृपतिचिन्ता राज्ञः शुभवृद्ध्यर्थे चिन्ता कार्या। यत्नो विधेय इति। यतो मूलात् फलसम्भवः फलसम्भवात् प्रजावृद्धिस्तदुपजीवनात्।

अत्राऽऽगमप्रदर्शनार्थमाह-

**या व्याख्याता शान्तिः स्वयम्भुवा सुरगुरोर्महेन्द्रार्थे।**
**तां प्राप्य वृद्धगर्गः प्राह यथा भागुरेः श्रृणुत।।२।।**

या शान्तिः स्वयम्भुवा ब्रह्मणा महेन्द्रस्य सुराधिपस्यार्थे सुरगुरोर्बृहस्पतेर्व्याख्याता कथिता ता शान्तिं वृद्धगर्गः प्राप्य लब्ध्वा यथा येन प्रकारेण भागुरेर्मुनिप्रधानस्य शिष्यस्य प्राहोक्तवात् तथा तां शान्तिं श्रृणुताऽऽर्कणयत्। तथा च वृद्धगर्गः- **बृ.सं.,पृ-५५८**

अथ पुष्यस्नानविधिमाह-

**पुष्यस्नानं नृपतेः कर्तव्यं दैववित्पुरोधाभ्याम्।**
**नातः परं पवित्रं सर्वोत्पातान्तकरमस्ति।।३।।**

नृपते राज्ञः पुष्यस्नानं पुष्येण नक्षत्रेण स्नपनम्। दैववित्पुरोधाभ्याम्। दैववित्सांवत्सरः, पुरोधा आचार्यः, एताभ्यां कर्तव्यम्। अतोऽस्मात् पुष्यस्नानात् परं प्रकृष्ट परमं पवित्रं पावनं तथा सर्वेषां निःशेषणामुत्पानामुपसर्गाणामन्तकरं नाशकरमन्यदपरं नास्ति न विद्यते।

कस्मिन् स्थाने पुष्यस्नानं नृपतिः कुर्यादित्याह-

**श्लेष्मातकाक्षकण्टकिकटुतिक्तविगन्धिपादपविहीने।**
**कौशिकगृध्रप्रभृतिभिरनिष्टविहगैः परित्यक्ते।।४।।**
**तरुणतरुगुल्मवल्लीलताप्रतानान्विते वनोद्देशे।**
**निरुपहतपत्रपल्लवमनोज्ञमधुरद्रुमप्राये।।५।।**

**कृकवाकुजीवजीवकशुकशिखिशतपत्रचाषहारीतैः।**

**क्रकरचकोरकपिञ्जलवञ्जुलपारावतश्रीकैः।।६ ।।**

**कुसुमरसपानमत्तद्विरेफपुंस्कोकिलादिभिश्चान्यैः।**

**विरुते वनोपकण्ठे क्षेत्रागारे शुचावथवा।।७।।**

**ह्रदिनीविलासिनीनां जलखगनखविक्षतेषु रम्येषु।**

**पुलिनजघनेषु कुर्याद् दृङ्मनसो प्रतिजननेषु।।८।।**

ह्रदिन्यो नद्यस्ता एव विलासिन्यो वारयोषितस्तासां यानि पुलिनानि तीराणि तान्येव जघनानि नितम्बप्रदेशास्तेषु कुर्यात्। कीदृशेषु ? जलखगनखविक्षतेषु, जलखगा उदकचराः पक्षिणस्तैर्नखविक्षतेषु करप्रहतेषु, तथा रम्येषु रमणीयेषु, दृङ्मनसोः प्रीतिजननेषु, दृशोश्चक्षुषोः, मनसश्चित्तस्य यानि प्रीतिं तुष्टिं जनयन्त्युत्पादयन्ति तथाभूतेषु। अत एव विलासिनीनां जघनेषु सादृश्यम्।।

अन्यत्कीदृशेषु कुर्यादित्याह-

**प्रोत्प्लुतहंसच्छत्रे कारण्डवकुररसारसोद्गीते।**

**फुल्लेन्दीवरनयने सरसि सहस्त्राक्षकान्तिघरे।।९।।**

अथवा सरसि कुर्यात। कीदृशे ? सहस्त्राक्षकान्तिधरे, सहस्त्रात्रा इन्द्रस्तस्य सम्बन्धिनीं कान्तिं रुचिं यो धारयति विभर्ति तस्मिन्। किम्भूते ? प्रोत्प्लुतहंसच्छत्रे, प्रोत्प्लुता उड्डीयमाना ये हंसाः पक्षिविशेषाः, त एव छत्रमातपत्रं यत्र। तथा कारण्डवैः कुररैः सारसैश्च पक्षिविशेषैरुद्गीतं गानं क्रियते यत्र। फुल्लानि विकसितानि इन्दीवराणि नीलोत्पलानि नयनानि नेत्राणि यत्र। अत एव सहस्त्राक्षस्य सादृश्यम्।।

अन्यत्कीदृशे कुर्यादित्याह-

**प्रोत्फुल्लकमलवदनाः कलहंसकलप्रभाषिण्यः।**

**प्रोत्तुङ्गकुड्लमकुचा यस्मिनलिनीविलासिन्यः।।१०।।**

अथवा यस्मिन् स्थाने नलिनीविलासिन्यः पुष्करिण्य एव विलासिन्यः वारयोषितस्तत्र कुर्यात्। कीदृशः? प्रोत्फुल्लकमलवदनाः, प्रोत्फुल्लानि प्रविकसितानि कमलानि यानि पद्मानि तान्येव वदनानि मुखानि यासाम् तथा कलहंसा राजहंसास्तेषां कलं मधुरं यत् क्वणं

शब्दस्तदेव प्रभाषणं वचनं यासाम् तथा प्रोत्तुङ्गानि उच्चानि यानि कुङमलानि कर्णिकास्तान्येव कुचाः स्तना यासाम्। केचित् प्रोद्बद्धकुड्मलकुचा इति पठन्ति। प्रकर्षेणोद्बद्धानि अतिकठिनानि यानीति। अत एव विलासिनीनां सादृश्यम्।।

अन्यत्कीदृशे स्थाने कुर्यादित्याह-

**कुर्याद् गोरोमन्थजफेनलवशकृत्खुरक्षतोपचिते।**
**अचिरप्रसूतहुङ्कृतवल्गितवत्सोत्सवे गोष्ठे।।११।।**

**अथवा समुद्रतीरे कृशलागतरत्नपोतसम्बाधे।**
**घननिचुललीनजलचरसितखगशबलीकृतोपान्ते।।१२।।**

**क्षमया क्रोध इव जितः सिंहो भृग्याभिभूयते येषु।**
**दत्ताभयखगमृगशावकेषु तेष्वाश्रमेष्वथवा।।१३।।**

**काञ्चीकलापनूपुरगुरुघनोद्वहनविध्नितपदाभिः।**
**श्रीमति मृगेक्षणाभिर्गुहेऽन्यभृतवल्गुवचनाभिः।।१४।।**

अथवा गृहे वेभूनि कुर्यात्। कीदृशे? श्रीमति। श्रीर्विद्यते यस्मिन्। तथा एवंवि-धाभिः स्त्रीभिर्युक्ते? किम्भुताभिः। काञ्चीकलापनूपुरगुरुजघनोद्वहनविध्नितपदाभिः, काञ्ची मेखला तस्या यः कलापो विस्तार-स्तस्योद्वहनेन विध्नितौ मन्दगामिनौ पादौ चरणौ यासां ताभिः। मृगेक्षणाभिः हरिणसदृशनेत्राभिः। अन्यभृतवल्गुवचनाभिः, अन्यभृतः कोकिलस्तद्वद्वल्गु रम्यं मधुरं वचनं यासां ताभिर्युक्ते।।

अन्यत्कीदृशेषु स्थानेषु कुर्यादित्याह-

**पुण्येष्वायतनेषु च तीर्थेषूद्यानरम्यदेशेषु।**
**पूर्वोदक्प्लवभूमौ प्रदक्षिणाम्भोवहायां च।।१५।।**

या धात्री भूरेवंविधा तस्यां पुष्यस्नानं कुर्यात्। कीदृशी? भस्मना भूतिना। अङ्गारै-र्दग्धकाष्ठैः। अस्थिभिः। ऊषराः ससिकताश्च ताभिः। तुषैः शालिचर्मभिः। केशैः। श्वभ्रैः खातैः। कर्कटाः प्राणिनो मृगजा-यस्तेषामावासा गृहाणि विद्यन्ते येषां तैः सन्त्यक्ता वल्मीककृतैर्मृतस्तूपै रहिता सा शुभा। च शब्दः समुच्चये। न केवलं भस्माङ्गारादिदोषै रहिता यावच्छ्वा-विधादिभिर्दोषै रहितेति।

अथ तत्र विधानमाह-

**निष्क्रम्य पुरान्नक्तं दैवज्ञामात्ययाजकाः प्राच्याम्।**

**कौबेर्यां वा कृत्वा बलिं दिशीशाधिपायां वा।।१८।।**

**लाजाक्षतदधिकुसुमैः प्रयतः प्रणतः पुरोहितः कुर्यात्।**

**आवाहनमथ मन्त्रस्तस्मिन् मुनिभिः समुद्दिष्टः।।१९।।**

लाजाक्षतेति। प्रयतः संयुतः। प्रणतःप्रह्न। पुरोहितो लाजाभिरक्षतैर्यवैर्दध्ना क्षीरविकारेण कुसुमैः पुष्पैरावाहनमामन्त्रणं कुर्यात्।तस्मिन्नावाहने मुनिभिर्गार्गादिभिरयं वक्ष्यमाणो मन्त्रः समुद्दिष्ट उक्तः।।

अधुना तमेवाह –

**आगच्छन्तु सुराः सर्वे येऽत्र पूजाभिलाषिणः।**

**दिशो नागा द्विजाश्चैव ये चाप्यन्येंऽशभागिनः।।२०।।**

**आवाह्यैवं ततः सर्वानेवं ब्रूयात् पुरोहितः।**

**श्वः पूजां प्राप्य यास्यन्ति दत्त्वा शान्तिं महीपतेः।।२१।।**

सर्वे सूरा ये चात्रास्मिन् पूजाभिलाषिणोऽर्चार्थिनस्ते सर्वः एव निःशेषा आगच्छन्तु आयान्तु। तदा दिश आशाः। नागाः पन्नगाः। द्विजा मुनयः। ये चाप्यन्ते परे चानुकीर्तिताः। अंशभागिनो भागभाजस्ते आयान्तु।

एवमनेन प्रकारेण सर्वानशेषानावाह्य परिनिमन्त्र्य ततः पश्चादनन्तरं पुरोहितं आचार्थ एवमनेन प्रकारेण ब्रूयाद्वदेत्। येऽत्र सुरा आगतास्ते श्वः प्रातः पूजामर्चां प्राप्य लब्ध्वा महीपते राज्ञः शान्तिं श्रेयो दत्वा यास्यन्ति गमिष्यन्ति।।

ततः किं कुर्यादित्याह-

**आवाहितेषु कृत्वा पूजां तां शर्वरीं वसेयुस्ते।**

**सदसत्स्वप्ननिमित्तं यात्रायां स्वप्नविधिरुक्तः।।२२।।**

तेष्वावाहितेषु सुरेषु पूजामर्चां विधाय तां शर्वरीं रात्रिं ते दैवज्ञामात्ययाजका वसेयु-स्तिष्ठेयुः। किमर्थम्? सदसत्स्वप्ननिमित्तम् शुभाशुभसन्दर्शनार्थम्। यात्रायां यज्ञेष्वश्वमेधीयायां स्वप्नविधिः स्वप्नपरीक्षण-विधिरुक्तः कथितः। तथा च यात्रायाम् –

ततः किं कुर्यादित्याह-

**अपरेऽहनि प्रभाते सम्भारानुपहरेद्यथोक्तगुणान्।**

**गत्वाऽवनिप्रदेशे श्लोकाश्चाप्यत्र मुनिगीताः॥२३॥**

अपरेऽहनि द्वितीयदिने प्रभाते प्रभातसमये तस्मिन्नेवावनिप्रदेशे भूस्थाने गत्वा यथोक्तगुणान् यथोपयोज्यान् सम्भारानुपहरेत् ढौकयेत्। अत्राप्यस्मिन्नर्थे श्लोका मुनिगीताः, मुनिना महर्षिणा वृद्धगर्गेण गीताः कथिताः। अपिशब्दः सम्भावनायाम्॥

तांश्चाह-

**तस्मिन् मण्डलमालिख्य कल्पयेत्तत्र मेदिनीम्।**

**नानारत्नाकरवतीं स्थानानि विविधानि च॥२४,२५,२६॥**

**वर्णकैर्विविधैः कृत्वा हृद्यैर्गन्धगुणान्वितैः।**

**यथास्वतं पूजयेद्विद्वान् गन्धमाल्यानुलेपनैः॥२७,२८॥**

तथा भक्ष्यैर्विविधैर्नानाकारैर्मोदकलोपिकापूपादिभिः। अन्नैश्च नानाप्रकारैरोदनपायसादिभिः। नाना-प्रकारैः फलैः श्रीफलादिभिः। मूलैः प्रसिद्धैः। आमिषैर्मांसैः। विविधैर्नानाप्रकारैर्हृद्यैर्हृदयचोदकैः पानैर्मदकरैः। तथा सूरया मद्येन क्षीरेण दुग्धेन। आसवेन मध्वासवेन। आदिग्रहणाल्लेह्यपेयचोष्यादिभि-रन्यैश्च पानविशेषैः पूजयेत्॥

अतः परं पूजां कथयामीत्याह-

**कथयाम्यतः परमहं पूजामस्मिन् यथाभिलिखितानाम्।**

**ग्रहयज्ञे यः प्रोक्तो विधिर्ग्रहाणां स कर्तव्यः॥२९,३०॥**

**शेषांस्तु सार्ववर्णिकबलिभिः पूजां न्यसेच्च सर्वेषाम्।**

**प्रतिसरवस्त्रपताकाभूषणयज्ञोपवीतानि॥३१,३२,३३॥**

कथयामीति। अतोऽस्मात्परमहमाचार्योऽस्मिन् मण्डले यथाभिलिखितानां विन्यस्तानां पूजामर्चां कथयामि वक्ष्यामि। ग्रहाणामादित्यादीनां यात्रायां ग्रहयज्ञे योऽयं विधिः प्रोक्तं कथितः स एवात्र कर्तव्यः। तद्यथा-

ततः किं कुर्यादित्याह-

**मण्डलपश्चिमभागे कृत्वाग्निं दक्षिणेऽ थवा वेद्याम्।**

**आदद्यात् सम्भारान् दर्भान् दीर्घानगर्भांश्च॥३४॥**

मण्डलस्य पश्चिमभागे पश्चिमायां दिशि दक्षिणेऽथवा दक्षिणभागे वेदिं कुर्यात्। वेदी लक्षणमस्माभिः प्रागुक्तं नीराजने। तस्यां वेद्यामग्निं हुताशनं कृत्वा प्रज्वाल्य ततः सम्भारानौ-पयोगिनादद्यात् ढौकयेत्। दर्भान् दीर्घानच्छिन्नानगर्भान् गर्भरहितांश्चाऽऽहेरत्।

अन्यत्किमितयाह-

**लाजाज्याक्षतदधिमधुसिद्धार्थकगन्धसुमनसो धूपः।**

**गोरोचनाञ्जनतिलाः स्वर्तुजमधुराणि च फलानि।।३५।।**

**सघृतस्य पायसस्य च तत्र शरावाणि तैश्च सम्भारैः।**

**पश्चिमवेद्यां पूजां कुर्यात् स्नानस्य सा वेदी।।३६।।**

लाजाः प्रसिद्धाः। आज्यं घृतम्। अक्षता यवाः। दधि क्षीरविकारः। मधु माक्षिकम्। सिद्धार्था गौरसर्षपाः। गन्धाः सुगन्द्रव्याणि। सुमनसः पुष्पाणि। धूपः प्रसिद्धः। गोरोचना गोपित्तसम्भवा। अञ्जनं प्रसिद्धम्। तिलास्तथा। स्वर्तुजानि स्वर्तावात्मीयर्तौ जातानि उत्पन्नानि यानि मधुराणि फलानि।

तथा तस्मिन् मण्डले सघृतस्य धृतसहितस्य च पायसस्य शरावाणि मृन्मयानि पात्राणि सुपरिपूर्णानि दातव्यानि। तैश्च सम्भारैः पूर्वोक्तैः पश्चिमायां वेद्यां पूजां कुर्यात्। यतः सा वेदी स्नातस्य। तस्यां पुष्यस्नानं कार्यमित्यर्थः।।

ततः किं कुर्यादित्याह-

**तस्याः कोणेषु दृढान् कलशान् सितसूत्रवेष्टितग्रीवान्।**

**साक्षीरवृक्षपल्लवफलापिधानान् व्यवस्थाप्य।।३७।।**

**पुष्यस्नानविमिश्रेणापूर्णानम्भसा सरत्नांश्च।**

**पुष्यस्नानद्रव्याण्यादद्याद् गर्गगीतानि।।३८।।**

**सहां स सहदेवीं च पूर्णकोशां शतावरीम्।**

**अरिष्टिकां शिवां भद्रां तेषु कुम्भेषु विन्यसेत्।।३९, ४०।।**

**रत्नानि सर्वगन्धांश्च बिल्वं च सविकङ्कतम्।**

**प्रशस्तनाम्न्यश्चौषध्यो हिरण्यं मङ्गलानि च।।४१, ४२।।**

रत्नानि मणिविशेषाः। सर्वगन्धाश्च निःशेषसुगन्धद्रव्याणि। बिल्वं फलम्। सविकङ्कतं विकङ्कतफलेन सह। प्रशस्तनाम्न्यो या ओषधयः। यथा- जया। जयन्ती। जीवन्ती। जीवत्पुत्रिका। पुनर्नवा। विष्णुक्रान्ता। चक्राङ्का। वाराही। लक्षणा। हिरण्यं सुवर्णादयो धातवः। मङ्गलानि च मङ्गलवन्त्यौषधानि। यथा - गोरोचना। सर्षपः। दूर्वाहस्तिमदमिति। एवमादि।।

ततः किं कुर्यादित्याह-

**आदावनडुहश्चर्म जरया संहृतायुषः।**

**प्रशस्तलक्षणभृतः प्राचीनग्रीवमास्तरेत्।।४३।।**

**चत्वार्येतानि चर्माणि तस्यां वेद्यामुपास्तरेत्।**

**शुभे मुहूर्ते सम्प्राप्ते पुष्ययुक्ते निशाकरे।।४४, ४५।।**

आदौ प्रथममनडुहो बलीवर्दस्य चर्म। कीदृशस्य? जरया वार्द्धकेन संहृतायुषो मृतस्य। पुनः कीदृशस्य? प्रशस्तलक्षणभृतः, प्रशस्तानि गोलक्षणोक्तानि लक्षणानि विभर्ति धारयति तस्य। ततश्च प्राचीनग्रीवं पूर्वाभिमुखकण्ठमास्तरेम् प्रसारयेत्।

ततोऽन्तरं योधस्य वृषस्य रोहितं लोहितवर्ण चर्म। अक्षतमच्छिद्रमास्तरेत्। द्वितीयम्। अनन्तरं सिंहस्य चर्म तृतीयं चाऽऽस्तरेत्। ततः पर चतुर्थं व्याध्रस्य चर्माऽऽस्तरेत्।

एतानि चत्वारि चर्माणि तस्यां प्रागुक्तायां वेद्यामुपास्तरेत्। कस्मिन् काले ? निशाकरे चन्द्रे पुष्ययुक्ते पुष्यस्य योगतारकसमीपस्थे, शुभे च मुहूर्ते सम्प्राप्ते।

ततः किं कुर्यादित्याह-

**भद्रासमेकतमेन कारितं कनकरजतताम्राणाम्।**

**क्षीतररुनिर्मितं वा विन्यस्य चर्मणामुपरि।।४६।।**

**त्रिविधस्तस्योच्छ्रायो हस्तः पादाधिकोऽर्धयुक्तश्च।**

**माण्डलिकानिन्तरजित्समस्तराज्यार्थिनां शुभदः।।४७।।**

कनकं सुवर्णम्। रजतं रूप्यम्। ताम्रं प्रसिद्धम्। एषां कनकरजतताम्राणामेकतमेनान्यतमेन भद्रासनं भद्रपीठं कारितं निर्मितम्। अथवा क्षीरतरवः क्षीरवृक्षा अर्कपिप्पलौदुम्बरादयस्तन्निर्मितं तन्मयम्। तथाभूतं तेषां प्राक्तनानां चर्मणामुपर्युपरि स्थितानामुपरि विन्यस्यं स्थाप्यम्।

त्रिविधस्तस्योच्छ्राय इति। तस्य भद्रासनस्य त्रिविधस्त्रिप्रकार उच्छ्राय औच्च्यम्। हस्तः शयो माण्डलिकानां राज्ञां शुभदः शर्मदः। पादाधिको हस्तः, त्रिंशदङ्गुलानीत्यर्थः। अनन्तरजितां विजिगीषूणां राज्ञां शुभदः। अर्धयुक्तो हस्तः। सार्धशयः समस्तराज्यार्थिनां राजाधिराजैषिणां राज्ञां शुभदः।।

ततः किं कुर्यादित्याह-

**अन्तर्धाय हिरण्यं तत्रोपविशेन्नरेश्वरः सुमनाः।**

**सचिवाप्तपुरोहितदैवपौरकल्याणनामवृतः।।४८।।**

तत्र तस्मिन् भद्रासने हिरण्यं सुवर्णमन्तर्धायाभ्यन्तरे क्षिप्तवा नरेश्वरो राजा सुमनाः शोभनचित्तः। उपविशेदध्यारोहत्। सचिवैर्मन्त्रिभिः। आप्तैर्जनैर्विश्वस्तैर्बन्धुभिः। पुरोहितनाचार्येण। दैवशब्देन दैवज्ञः। सांवत्सरिक उच्यते। एतैर्वृतः समायुक्तः। तथा अन्यैश्च पोरैर्जनैः कल्याणनामभिर्वृतः परिवृतः। कल्याणनामानः शुभनामानः। यथा - जयराजः सिंहराजः, बन्धुराजः, व्याघ्रराजः इत्येवमादि।

किम्भूतो राजेत्याह-

**वन्दिजनपौरविप्रैः प्रघूष्टपुण्याहवेदनिर्घोषैः।**

**समृदङ्गशङ्खतूर्यैर्मङ्गलशब्दैर्हतानिष्टः।।४९।।**

वन्दिनश्चाटुकारिणस्तैर्वन्दिजनैः। तथा पौरैश्च नागरैः। विप्रैर्ब्राह्मणैः। एतैः कीदृशैः? प्रघुष्टपुण्याहवेदनिर्घोषैः। प्रकर्षेण घुष्ट उद्धोषितः पुण्याहशब्दो वेदशब्दश्च यैः। एतैः। तथा समृदङ्गशंख-तूर्यैर्मङ्गलशब्दैः, सह मृदङ्गशब्दैः, शङ्खशब्दैः, तूर्यशब्दैर्ये मङ्गलशब्दा वर्तन्ते तैर्हतो विनाशितोऽनिष्टोऽशुभः शब्दो यस्य स तथोक्तः।।

ततः किं कुर्यीदत्याह-

**अहतक्षौमनिवसनं पुरोहितः कम्बलेन सञ्छाद्य।**

**कृतबलिपूजं कलशैरभिषिश्चेत् सर्पिषा पूर्णैः।।५०।।**

**अष्टावष्टाविंशतिरष्टशतं वापि कलशपरिमाणम्।**

**अधिकेऽधिके गुणोत्तरमयं च मन्त्रोऽत्र मुनिगीतः।।५१।।**

**आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम्।**

**आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः।।५२।।**

**भौमान्तरिक्षं दिव्यं वा यत्ते कल्मषमागतम्।**

**सर्वं तदाज्यसंस्पर्शात् प्रणामशमुपगच्छतु।।५३।।**

आज्यं घृतं तदेव तेजः समुद्दिष्टं कथितम्। तथा आज्यं परं प्रकृष्टं पापहरं कल्मष-नाशनम्। आज्यं सुराणां देवानामाहारो भोजनम्। आज्ये लोका भूर्लोकादयः प्रतिष्ठिताः स्थापिताः।

ते तव कल्मषं यत्पापं दिव्यं ग्रहनक्षत्रविकाराजम्। आन्तरिक्षमुल्कानिर्धातपवनपरिवेष-गन्धर्वपुरपुरन्दरचापादिजातम्। भौमं वा चरस्थिरोद्भवम्। आगतं प्राप्तम्। तत्सर्वम् मआज्यसंस्पर्शात् घृतसंस्पर्शमात्रादेव प्रणाशं क्षयमुपगच्छतु प्रयातुं।।

ततः किं कुर्यादित्याह-

**कम्बलमपनीय ततः पुष्यस्नानाम्बुधिः सफलपुष्पैः।**

**अभिषिञ्चेन्मनुजेन्द्रं पुरोहितोऽनेन मन्त्रेण।।५४।।**

ततोऽनन्तरं कम्बलमपनीयापास्य। ततः सफलपुष्पैः फलपुष्पसहितैः। पुष्यस्नानाम्बुभिः पुष्यस्नान-द्रव्ययुक्तैर्जलैः। पुरोहित आचार्यो मनुजेन्द्रं राजानमनेन मन्त्रेणाभिषिञ्चेदभिषेकं कुर्यादिति।

अथ तमेव स्नानमन्त्रमाह-

**सुरास्त्वाभिषिञ्चन्तु ये च सिद्धाः पुरातनाः।**

**ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च समरुद्गणाः।।५५,५६,५७।।**

**देवपत्न्यश्च सा नोक्ता देवमातर एव च।**

**सर्वास्त्वाभिषिञ्चन्तुं दिव्याश्चाप्सरसां गणाः।।५८,५९,६०।।**

**सशिष्यास्तेऽभिषिञ्चन्तु सदाराश्च तपोधनाः।**

**वैमानिकाः सुरगणा मनवः सागरैः सह।।६१,६२,६३।।**

**एकतश्च द्वितश्चैव त्रितो जाबालिकश्यपौ।**

**दुर्वासा दुर्विनीतश्च कण्वः कात्यायनस्तथा।।६४,६५,६६।।**

**द्वैपायनो यवक्रीतो देवराजः सहानुजः।**

**पर्वतास्तरवो वल्ल्यः पुण्यान्यायतनानि च।।६७,६८,६९।।**

**तोयैस्त्वामभिषिञ्चन्तु सर्वोत्पातनिबर्हणैः।**

**यथाभिषिक्तो मघवानेतैर्मुदितमानसैः।।७०।।**

अथ पयोऽभिषेकमन्त्रः सुबोधस्तथापि मन्दबुद्धिव्यूत्पादनाय किञ्चिद् व्याख्यायते। सुरा देवास्त्वां नृपमभिषिञ्चन्तुं। ये च सिद्धा देवयोनयः। पुरातनाः ब्रह्माद्याः सुराः। साध्याः समरुद्गणाः, मरुतां गणैर्वायुसमूहैः सहिताः। भिषग्वरौ वैद्यप्रधानावश्विनौ। अदिति र्देवमाता सुरजननी। स्वाहाद्या देवताः। सिनीवाली दृश्यचन्द्रा अमावास्यां यस्यां प्रभाते शशी दृश्यते, नष्टक्षपाकरा अमावास्या कुहूफ, यस्यां प्रभाते चन्द्रमा न दृश्यते। दनुप्रभृतयः कश्यपपत्न्यः। देवपत्न्यः सुरदाराः। देवमातरः सुरजनन्यः। एताः सर्वास्त्वामभिषिञ्चन्तु। दिवि भवा दिव्याः। अप्सरसां गणाः समूहाः। नक्षत्राण्यश्विन्यादीनि सप्तविंशतिः। मुहूर्ताः क्षणाः। पक्षाहोरात्राणि। तेषां ये च सन्धयः। संवत्सरा वर्षाणि। दिनेशाः सूर्योदयः सप्तग्रहोः। कलाद्याः कालावयवाः। कालस्याङ्गानि। एत उक्त अन्ये परे च मुनयः ऋषयो वेदव्रतपरायणा वेदासक्ताः। सशिष्याः शिष्यसहिताः। सदाराः सकलत्राः। तपोधनस्तपः प्रधानाः तपस्विनः। वैमानिका विमानेन ये यान्ति। मनवः। सागरैः समुद्रैः सहिताः। सरितो नद्यः। महाभागः प्रधानाः। नागाः। किम्पुरुषाः किन्नराः। वैखानसा वैहायसा इति संज्ञाविकृताः। सदाराः सपत्नीकाः ध्रुवस्थानानि ध्रुवप्रदेशाः। दीर्घतपा मुनिविशेषः। द्वैपायनो व्यासः। देवराज इन्द्रः। सहानुजैर्भ्रातृभिः सह। जीमूता मेघाः। खं नभः। दिश आशाः। जलमुदकम्। एते ये उक्तास्तथा अन्येऽपरे बहवः प्रभूताः। पुण्य-सङ्कीर्तनाः। पुण्यं पवित्रं सर्वोत्पातनिबर्हणैः, सर्वेषातुत्पातानां यानि निबर्हणानि नाशकर्तृणि तैः। निःशेषानिष्टनिवारणैः। यथा येन प्रकारेणैतैः पूर्वोक्तै-र्देवतानुनिभिः। मुदितमानसैः संहृष्टचितैः। मघवानिन्द्रः पूर्वमभिषिक्तस्तथा ते अभिषिञ्चन्त्विति।।

अथान्यान्मन्त्रानप्याह-

**इत्येतैश्चान्यैश्चाप्यथर्वकल्पाहितैः सरुद्रगणैः।**

**कौष्माण्डमहारौहणकुबेरहृद्यैः समृद्धया च।।७१।।**

इत्येवंप्रकारैरेतैर्मन्त्रैस्तथान्यैरपरैरप्यथर्वकल्पाहितैरथर्वकल्पनिर्दिष्टैः। सरुद्रगणै रुद्र-गणसहितैः। एकादशानुवाका रुद्राः। कौष्माण्डैः, षडनुवाकाः कौष्माण्डाः महारौहिणेन मन्त्रेण। कुबेरहृदयेन समृद्धया ऋचा।।

ततः किं कुर्यादित्याह-

**आपोहिष्ठातिसृभिर्हिरण्यवर्णेति चतसृभिर्जप्तम्।**

**कार्पासिकवस्त्रयुगं बिभृयात् स्नातो नराधिपतिः।।७२।।**

ततो नराधिपती राजा स्नातः कृतस्नानः कार्पासिकवस्त्रयुगं बिभृयाद्धारयेत्। कार्पासि-केत्यनेनान्यवस्त्राणां परिहारः। कीदृशम् ? आपोहिष्ठेति तिसृभिर्ऋग्भिर्जप्तं तथा हिरण्यवर्णेति चतसृभि-र्ऋग्भिर्जप्तम्। आपोहिष्ठा हिरण्यवर्णेत्याद्यपदग्रहणम्।।

ततः किं कुर्यादित्याह-

**पुण्याहशङ्खशब्दैराचान्तोऽभ्यर्च्य देवगुरुविप्रान्।**

**छत्रध्वजायुधानि च ततः स्वपूजां प्रयुञ्जीत।।७३।।**

ततो नृपः पुण्याहशङ्खशब्दैश्च सहाऽऽचान्तः शुद्धकायो देवान् सुरान्। गुरुनुपाध्यायान्। विप्रान ब्राह्मणान्। अभ्यर्च्य सम्पूज्य। तथा छत्रध्वजायुधानि, छत्रमातपत्रम् , ध्वजं चिह्नम्, आयुधं खड्गादि। एतानि सम्पूज्य ततोऽनन्तर स्वपूजामात्मीयेष्टदेवतार्चां प्रयुञ्जीत कारयेदिति।।

ततः किं कुर्यादित्याह-

**आयुष्यं वर्चस्यं रायस्पोषाभिर्ऋग्भिरेताभिः।**

**परिजप्तं वैजयिकं नवं विदध्यादलङ्कारम्।।७४।।**

ततोऽनन्तरं नवमभिनवमलङ्कारं विभूषणादि वैजयिकं विजयावहं विदध्याद्धारयेत्। कीदृशम्? आयुष्यं वर्चस्यम्। रायस्योषाभिरेताभिः षड्भिर्ऋग्भिः परिजप्तमभिमन्त्रितम्।

ततः किं कुर्यादित्याह-

**गत्वा द्वितीयवेदी समुपविशेच्चर्मणामुपरि राजा।**

**देयानि चैव चर्माण्युपर्यपर्येवमेतानि।।७५।।**

**वृषस्य वृषदंशस्य रुरोश्च पृषतस्य च।**

**तेषामुपरि सिंहस्य व्याध्रस्य च ततः परम्।।७६।।**

**मुख्यस्थाने जुहुयात् पुरोहितोऽग्निं समित्तिलघृताद्यैः।**

**त्रिनयनशक्रबृहस्पतिनारायणनित्यगतिऋग्भिः।।७७।।**

पुरोहितं आचार्यः। मुख्यस्थानं प्रधानस्थानं दक्षिणस्थानमित्यर्थः। समित्तिलघृताद्यैः, समिद्भिः, तिलैः, घृतेनाज्येन च। आदिग्रहणादन्यैः शान्तिकैः श्रीफलादिभिरग्निं जुहुयात्। त्रिनयनो रुद्रः। शक्र इन्द्रः। बृहस्पतिर्देवगुरुः। नारायणो विष्णुः। नित्यगतिर्वायुः। एतत्सम्बन्धिन्य ऋचस्ताभिः।।

अन्यच्च-

**इन्द्रध्वजनिर्दिष्टान्यग्निमितित्तानि दैवविद् ब्रूयात्।**

**कृत्वाऽशेषसमाप्तिं पुरोहितः प्राञ्जलिर्ब्रूयात्।।७८।।**

**यान्तु देवगणाः सर्वे पूजामादाय पार्थिवात्।**

**सिद्धिं दत्त्वा तु विपुलां पुनरागमनाय च।।७९।।**

**नृपरितो दैवज्ञं पुरोहितं चार्चयेद्धनैर्बहुभिः।**

**अन्यांश्च दक्षिणीयान् यथोचितं श्रोत्रियप्रभृतीन्।।८०।।**

**दत्त्वाऽभयं प्रजानामाघातस्थानगान् विसृज्य पशून्।**

**बन्धनमोक्षं कुर्यादभ्यन्तरदोषकृद्वर्जम्।।८१।।**

**एतत्प्रयुज्यमानं प्रतिपुष्यं सुखयशोऽर्थवृद्धिकरम्।**

**पुष्याद्विनार्धफलदा पौषी शान्तिः परा प्रोक्ता।।८२।।**

एतत् स्नानं प्रतिपुष्यं पुष्यं पुष्यं प्रति प्रयुज्यमानं क्रियमाणं सुखयशोऽर्थवृद्धिकरं सुखस्य यशसेऽर्थस्य वृद्धिकरं भवति। पुष्याद्विना अन्यत्र क्रियमाणमधर्मफलं यथोक्तात् फलादर्धं ददाति। पौषी शान्तिः। पुष्यनक्षत्रेण युता पौषी पौर्णमासी च परा प्रकृष्टा प्रोक्ता कथिता।।

अथ केषु कालेषु पुष्यस्नानं कुर्यादित्याह-

**राष्ट्रोत्पातोपसर्गेषु राहोः केतोश्च दर्शने।**

**ग्रहावमर्दने चैव पुष्यस्नानं समाचरेत्।।८३।।**

**नास्ति लोके स उत्पातो यो ह्यनेन न शाम्यति।**

**मङ्गलं चापरं नास्ति यदस्मादतिरिच्यते।।८४।।**

**अधिराज्यार्थिनो राज्ञः पुत्रजन्म च काङ्क्षतः।**

**तत्पूर्वमभिषेके च विधिरेष प्रशस्यते।।८५।।**

**महेन्द्रार्थमुवाचेदं बृहत्कीर्तिबुहस्पतिः।**

**स्नानमायुष्प्रजावृद्धिसौभाग्यकरणं परम्।।८६।।**

**अनेनैव विधानेन हस्त्यश्वं स्नापयेत्ततः।**

**तस्यामयविनिर्मुक्तं परां सिद्धिमवाप्नुयात्।।८७।।**

यो राजा अनेनैव पूर्वोक्तेन विधानेन हस्त्यश्वं गजतुरगं स्नापयेत् तस्य राज्ञस्तद्धस्त्यश्वा-ममयविनिर्मुक्तं रोगरहितं परा ं प्रकृष्टा सिद्धिमाप्नुयाल्लभत् इति।।

## १०. पट्टलक्षणाध्यायः

तत्रादावेवाऽऽगमप्रदर्शनार्थमाह-

**विस्तरशो निर्दिष्टं पट्टानां लक्षणं यदाचार्यैः।**

**तत्संक्षेपः क्रियते मयाऽत्र सकलार्थसम्पन्नः।।१।।**

आचार्यैः काश्यपादिर्भिर्यत्पट्टानां नरेन्द्रमुकुटानां लक्षणं विस्तरशो विस्तरेण निर्दिष्टमुक्तम्। तस्य मया सकलार्थसम्पन्नः परिपूर्णार्थसमासः संक्षेपः क्रियते विरच्यत् इति।।

अधुना तदेवाह-

**पट्टः शुभदो राज्ञां मध्येऽष्टावङ्गुलानि विस्तीर्णः।**

**सप्त नरेन्द्रमहिष्याः षड् युवराजस्य निर्दिष्टः।।२।।**

**चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये।**

**द्वे च प्रसादपट्टः पञ्चैते कीर्तिताः पट्टाः।।३।।**

राज्ञां नृपाणां पट्टो मुकुटो मध्ये मध्यभागे अष्टावङ्गुलानि विस्तीर्णः कार्यः। नरेन्द्र-महिष्या राजपत्न्याः सप्ताङ्गुलानि मध्ये विस्तीर्णः। षडङ्गुलानि युवराजस्य निर्दिष्टः कथितः।

सेनापतेश्चमूनाथस्य मध्ये चतुरङ्गुलविस्तीर्णः कार्यः। द्वे चाङ्गुले प्रसादपट्टो विस्तीर्णः कार्यः। प्रसादपट्टं राजा कस्यचिद्दध्नानि। एवमेते पञ्च पट्टाः कीर्तिता उक्ताः।।

अन्यदप्याह-

**सर्वे द्विगुणायामा मध्यादर्धेन पार्श्वविस्तीर्णाः।**

**सर्वे च शुद्धकाञ्चनविनिर्मिताः श्रेयसो वृद्धयै।।४।।**

**पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिवमहिष्योः।**

**एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया।।५।।**

**क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।**

**वृद्धिजयौ भूमितेस्तथा प्रजानां च सुखसम्पत्।।६।।**

पट्टस्य सम्बन्धि पत्रं क्रियमाणं यदि सुखनाक्लेशेन विस्तारमेत्यायाति तदा भूमिपते राज्ञो वृद्धिजयौ भवतः। तथा प्रजानां लोकानां च सुखसम्प्त् सौख्यवृद्धिर्भवति।।

अन्यदप्याह-

**जीवितराज्यविनाशं करोति मध्ये व्रणः समुत्पन्नः।**

**मध्ये स्फुटितस्त्याज्यो विध्नकरः पार्श्वयोः स्फुटितः।।७।।**

पट्टस्य क्रियमाणस्य मध्ये व्रणश्छिद्रः समुत्पन्नो जीवितस्यायुषो राज्यस्य न विनाशं करोति। तथा मध्ये यः स्फुटितः स त्याज्यः। पार्श्वयोः स्फुटितः स विध्नकरः विध्नं करोति। तथा च काश्यपः- **बृ.सं.,पृ-५८३**

अथाशुभे लक्षणे दृष्टे किं कुर्यादित्याह-

**अशुभनिमित्तोत्पतौ शास्त्रज्ञः शान्तिमादिशेद्राज्ञः।**

**शस्तनिमित्तेः पट्टो नृपराष्ट्रविवृद्धये भवति।।८।।**

अशुभनिमित्तस्याशुभलक्षणस्योत्पत्तौ सत्यां शास्त्रज्ञः पट्टलक्षणज्ञो राज्ञो नृपस्य शान्तिमादिशेद्वदेत्। यः पट्टः शस्तनिमितः शुभलक्षणसंयुक्तः स नृपस्य राज्ञो राष्ट्रस्य च विवृद्धये भवति।।

## ११. खड्गलक्षणाध्यायः

तत्रादावेव खड्गस्य प्रमाणं व्रणानां च शुभाशुभ-ज्ञानार्थमाह-

**अङ्गुलशतार्धमुत्तम ऊनः स्यात् पञ्चविंशतिः खड्गः।**

**अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्वस्थः।।१।।**

उत्तमः प्रधानखड्गः। अङ्गुलशतार्धं पञ्चाशदङ्गुलानि दीर्घ इत्यर्थः। पञ्चविंशतिरङ्गुलानि च ऊनः कनीयान् खड्गः स्याद्भवेत्। अनयोः प्रमाणयोर्मध्ये स्थितः पञ्चाशत् ऊनः पञ्चविशंतेरधिकः स मध्यम एव। अङ्गुलमानाद्यो व्रणो विषमपर्वस्थः। अङ्गुलगणनया विषमाङ्गुले स्थितः। प्रथमतृतीयपञ्चम-सप्तमादिष्वङ्गुलेषु स्थितः सोऽशुभोऽनिष्टफलदः। अर्थादेव समाङ्गुलेषु द्वितीयचतुर्थ-षष्ठमादिषु यः स्थितः स शुभः। मिश्रेष्वङ्गुलेषु मध्यम इति।।

अथ व्रणानामाकृतिलक्षणमाह-

**श्रीवृक्षवर्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम्।**

**सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकानां च।।२।।**

श्रीवृक्षो बिल्वः। वर्धमानं चिह्नविशेषो वर्धमानवास्तुनः सदृशम्। केचिच्छारावक-मितीच्छन्ति। आतपत्रं छत्रम्। शिवलिङ्गं प्रसिद्धम्। कुण्डलं कर्णाभरणम्। अब्जं पद्मम्। एषां सदृशास्तुल्या आकृत्या ये व्रणास्ते खड्गे प्रशस्ताः शुभदाः। तथा ध्वजस्य चिह्नस्य पताकारूपस्य। आयुधस्य खड्गादेः। स्वस्तिकस्य चिह्नस्य स्वस्तिकवास्तुनः सदृशाश्च व्रणाः प्रशस्ता एव।।

अथाशुभलक्षणान्याह-

**कृकलासकाककङ्कक्रव्यादकबन्धवृश्चिकाकृतयः।**

**खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च।।३।।**

कृकलासः प्राणिविशेषः। काककङ्कौ प्रसिद्धौ। क्रव्यादा मांसाशिनो विहङ्गा श्येनगृध्र-प्रभृतयः। कबन्धच्छिन्नशिराः पुमान्। वृश्चिकः कीटजातिः। एतेषां सदृशी आकृतिर्येषां ते व्रणाः खड्गे अशोभना अशुभदाः तथा वंशानुगताः, वंशशब्देन खड्गमध्य उच्चभाग उच्यते। तत्र ये अनुगताः स्थिताः प्रभूताश्च बहवोऽपि श्वाकृतयस्तेऽप्यशुभा एव।।

अन्यल्लक्षणमाह-

**स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनोऽनुगतः।**

**अस्वन इति चानिष्टः प्रोक्तविपर्यस्त इष्टफलः।।४।।**

**क्वणितं मरणायोक्तं पराजयाय प्रवर्तनं कोशात्।**

**स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खडंगे।।५।।**

स्वयमेव खड्गस्य क्वणितं शब्दो मरणायोक्तम् खड्गस्वामिनो मृत्यवे कथितम्। कोशात् परिवाराप्रवर्तनमनिर्गमनं युद्धकाले पराजयाय भवति। स्वयमुद्गीर्णे परीवारात् स्वयमेव निर्गते खड्गे युद्धं संग्रामो भवति। संग्रामकाले ज्वलिते सज्वाले खड्गे विजयो भवति।।

अथ परिभाषार्थमाह-

**नाकारणं विवृणुयान्न विघट्टयेच्च पश्येन्न तत्र वदनं न वदेच्च मूल्यम्।**

**देशं न चास्य कथयेत् प्रतिमानयेन्न नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम्।।६।।**

नृपती राजा असियष्टिं खड्गयष्टिमकारणं निष्पयोजनं न विवृणुयाद् विगतवारणं न कुर्यात्, नोद्घाटयेदित्यर्थः , तथा अकारणं न विघट्टयेद् न चालयेत्। तत्र तस्यां खड्गयष्टौ वदनं मुखं न पश्येद् न निरीक्षयेत्, तथा अकारणं मूल्यं न वदेद् न ब्रूयात। तथा खड्गस्य देशं जातिं न कथयेत्। अमुकदेशजोऽयं खड्ग इति। न प्रतिमानयेद् नाङ्गुलैर्मिनुयात्, तथा अप्रयतोऽसमाहितोऽपि यष्टिं न स्पृशेत्।।

अन्यल्लक्षणमाह-

**गोजिह्वासंस्थानो नीलोत्पलंवशपत्रसदृशश्च।**

**करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः।।७।।**

**निष्पन्नो न छेद्यो निकषैः कार्यः प्रमाणयुक्तः सः।**

**मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने।।८।।**

**यस्मिन त्सरुप्रदेशे व्रणो भवेत् तद्वदेव खड्गस्य।**

**वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा।।९।।**

**अथवा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तदवधार्य।**

**केशस्थस्यादेश्यो व्रणोऽस्ति शास्त्रं विदित्वेदम्।।१०।।**

वाशब्दः प्रकारे। अथवा निस्त्रिंशभृत्प्रष्टा खड्गे गृहीते ससंशयः पृच्छति, यथा अस्मिन खड्गे व्रणोऽस्ति न वेति। तत्रायमुपायः –तस्मिन् काले यल्लग्नं वर्तते तस्य यदि के केन्द्रस्थः पापग्रहो भवति, तदा निश्चयात्तस्मिनं खड्गे व्रणो भवति। एवं व्रणे ज्ञाते सति स निस्त्रिंशभृत्प्रष्टा यदङ्ग स्वावयवं स्पृशति तदङ्गं समवधार्यावलोक्य कोशस्थस्यैव खड्गस्य व्रण आदेश्यो वक्तव्यः। इदं वक्ष्यमाणमपि शास्त्रं विदित्वां ज्ञात्वा।।

तच्चाह-

**शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितये ललाटसंस्पर्शे।**

**भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे च।।११।।**

**नासौष्ठकपोलहनुश्रवणग्रीवांसके च पञ्चाद्याः।**

**उरसि द्वादशसंस्थस्त्रयोदशे कक्षयोर्ज्ञेयः।।१२।।**

**स्तनहृदयोद्रकुक्षिनाभौ तु चतुर्दशादयो ज्ञेयाः।**

**नाभीमूले कटयां गुह्ये चैकोनविंशतितः।।१३।।**

**ऊर्वोर्द्वाविंशे स्यादूर्वोर्मध्ये व्रणस्त्रयोविंशे।**

**जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च।।१४।।**

**जङ्घामध्ये गुल्फे पाष्ण्यां पादे तदङ्गुलीष्वपि च।**

**षड्विंशतिकाद् यावत्त्रिंशदिति मतेन गर्गस्य।।१५।।**

जङ्घयोर्मध्यभागस्पर्शने षड्विंशेऽङ्गुले व्रणो वाच्यः। गुल्फस्पर्शने सप्तविंशे। पार्ष्णिस्पर्शनेऽष्टाविंश। पादस्पर्शने एकोनित्रिंशे। पादाङ्गुलीस्पर्शने त्रिंशे। एवं षड्विंशादङ्गुलात् प्रभृति यावत्त्रिंशदङ्गुलानि तावद्वाच्यम्। इत्यनेन प्रकारेण गर्गस्य मुनेर्मतेनेति। तथा च गर्गः-

**बृ.सं.,पृ-५९०**

अथैतेषां व्रणानां फलान्याह-

**पुत्रमरणं धनाप्तिर्धनहानिः सम्पदश्च बन्धश्च।**

**एकाद्यङ्गुलसंस्थैर्व्रणैः फलं निर्दिशते क्रमशः।।१६।।**

मूलात् प्रभृति प्रथमेऽङ्गुले यदि व्रणो दृश्यते, तदा पुत्रमरणं सुतमृत्युः स्वामिनो भवति। द्वितीये धनाप्तिर्वित्तलाभः। तृतीये धनहानिरर्थनाशः। चतुर्थे सर्वार्थानां सम्पदः। पञ्चमे बन्धो बन्धनम्। एवमेकाद्यङ्गुलसंस्थैव्रर्सणैः क्रमशः क्रमेण पारिपाट्या फलं निर्दिशेद् वदेत्।।

अन्येष्वाह-

**सुतलाभः कलहो हस्तिलब्धयः पुत्रमरणधनलाभौ।**

**क्रमशो विनाशवनिताप्तिचितदु : खानि षट्प्रभृति।।१७।।**

**लब्धिर्हानिः स्त्रीलब्धयो वधो वृद्धिमरणपरितोषाः।**

**ज्ञेयाश्चतुर्दशादिषु धनहानिश्चैकविंशे स्यात्।।१८।।**

**वित्ताप्तिरनिर्वाणं धनागमो मृत्युसम्पदोऽस्वत्वम्।**

**ऐश्वर्यमृत्युराज्यानि च क्रमात् त्रिंशदिति यावत्।।१९।।**

**परतो न विशेषफलं विषमसमस्थास्तु पापशुफलदाः।**

**कैश्चिदफलाः प्रदिष्टास्त्रिंशत्परतोऽग्रमिति यावत्।।२०।।**

अतोऽस्मात् त्रिंशतः परतो न विशेषफलं भवति, सामान्याद्विषमसमस्थाश्च पापशुभफलदाः। ये विषमाङ्गुलस्था व्रणास्ते पापफलदा अनिष्टफलदाः , ये च समाङ्गुलस्थास्ते शुभफलदाः। तथा च गर्गः। **बृ.सं.,पृ-५९२**

कैश्चिदफला इति कैश्चिन्मुनिभिः पराशरादिभिस्त्रिंशत्परतोऽग्रं यावदफला निष्फला प्रदिष्टा उक्ताः। तथा च पराशरः- **बृ.सं.,पृ-५९२**

तेषां प्रमाणानि। जघन्यमङ्गुलानि पञ्चविंशतिः। मध्यमं त्रिंशत्। उत्तमं चत्वारिंशत्। अतो हीनमतिरिक्तं वा न धारयेत्। पूर्णात् प्रत्यङ्गुलान्तरितेषु व्रणेष्वनाकृतिषु यावत्त्रिंशदङ्गुलं तावत्क्रमात् फलनियमः। पुत्रनाशोऽर्थानाशोऽर्थसच्चयो गृहदाहो मित्रलाभो व्याधिभयं सुखाप्तिर्ज्ञातिबन्ध आज्ञाप्राधान्यं विपक्षोत्पत्तिर्वाहनलाभः शोकः प्रव्रज्यासुतज्ञातिकुलच्छेदो माहत्म्यबललाभः सन्तापः क्लेशः पुत्रलाभो धनागमः शोकः प्रामाण्यमाधिपत्यमुपभोगो भयं दौर्भाग्यमैश्वर्य राजपूजेति। परतः सर्वप्रशस्तं विन्द्यात्।। इति।।

अथ गन्धलक्षणमाह-

**करवीरोत्पलगजमदघृतकुङ्कुमकुन्दचम्पकसगन्धः।**

**शुभदोऽनिष्टो गोमूत्रपङ्कमेदः सदृशगन्धः।।२१।।**

**कूर्मवसासृक्क्षारोपमश्च भयदुः खदो भवति गन्धः।**

**वैदूर्यकनकविद्युत्प्रभो जयारोग्यवृद्धिकरः।।२२।।**

**इदमौशनसं च शस्त्रपानं रुधिरेण श्रियमिच्छतः प्रदीप्ताम्।**

**हविषा गुणवत्सुताभिलिप्सोः सलिलेनाक्षयमिच्छतश्च वित्तम्।।२३।।**

**वडवोष्ट्रकरेणुदुग्धपानं यदि पापेन समीहतेऽर्थसिद्धम्।**

**झषपित्तमृगाश्वबस्तदुग्धैः करिहस्तच्छिदये सतालगर्भै :।।२४।।**

तैः किम्भूतैः। सतालगर्भैः सह तालगर्भेण ये वर्तन्ते। तालो वृक्षस्तस्य गर्भो निर्यासः। तथा च पराशरः- **बृ.सं.,पृ-५९३**

अथ पायनानि क्षीरपायितमरिबधार्थी धारयेत्। तिलतैलारालाभ्यामर्थार्थी। पुत्रार्थी उदकेन। सर्पिषा श्रीकामः। साहसिकः शोणितेन। हस्त्यश्वोष्ट्रक्षीरैः शिलासारच्छेदकामः। अजाक्षीरेण तालवसया मत्स्यवडवाहरिणपित्तेन द्विरदस्कन्धच्छेदकामः। नित्यं चैनं धूपपुष्पगन्धोपहारैरर्चयित्वा शिरस्यपशायिनं कुर्यात्। नावमन्येत न चोच्छिष्टः संस्पृशेत्। नादर्शकी कुर्यात्। नानिमित्तं विवृणुयात्। क्रीडनायास्य मूलं विवृणुयात् इति।।

अन्यत्पानमाह-

**आर्कं पयो हुडुविषाणमषीसमेतं पारावताखुशकृता च युतः प्रलेपः।**

**शस्त्रस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु**

**भवेद्विघातः।।२५।।**

**क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत्।**

**सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम्।।२६।।**

कदली वृक्षविशेषः प्रसिद्धो रम्भाख्यः। तां दग्ध्वा क्षारं यद्भवति, तस्मिन् क्षारे मथितेन तक्रेण सहिते दिनोषिते अहोरात्रमेकीकृत्य स्थापिते यदाऽऽयासं लोहं पायितं दत्तपानं सम्यक् शितं तीक्ष्णीकृतमश्मनि पाषाणे भङ्गं नैति न याति, न च तस्यान्यलोहेष्वपरशस्त्रेष्वपि कौण्ठयं कुण्ठत्वं भवति।।

## १२. अङ्गविद्याध्यायः

अथ परं केचिदङ्गविद्यां पठन्ति। आचार्येण प्रागेवोक्तं वास्तुविद्याङ्गविद्येति। तस्मादस्माभिर्व्याख्यायते। तत्रादावेव प्रयोजनप्रदर्शनार्थमाह-

**दैवज्ञेन शुभाशुभं दिगुदितस्थानाहृतानीक्षता**

**वाच्यं प्रष्टृनिजापराङ्गघटनां चालोक्य कालं धिया।**

**सर्वज्ञो हि चराचरात्मकतयाऽसौ सर्वदर्शी विभु-**

**श्चेष्टाव्याहृतिभिः शुभाशुभफलं सन्दर्शयत्यर्थिनाम्।।१।।**

दैवज्ञेन सांवत्सरिकेण इमानि च वस्तूनि ईक्षता विचारयता प्रष्टुः शुभाशुभफलं वाच्यं वक्तव्यम्। कानीत्याह- दिशागा पूर्वादिका। उदितं व्याहृतमुक्तं पृच्छकेन। स्थानं प्रदेशो यत्र स्थितः। आहृतं तत्कालं केनचिद्यत्किञ्चिदानीतम्। एतानीक्षता। तथा प्रष्टृनिजापराङ्गघटनां चालोक्यं , प्रष्टुः प्रच्छकस्य निजाङ्गा-नामात्मीयावयवानामपराङ्गानामन्यावयवानां च घटनां स्थितिं स्पर्शनादिकां कालं च तत्काले दिनगतशेषं च धिया वृद्धया आलोक्य वीक्ष्य वाच्यम्। सर्वज्ञो हीति। यतोऽसौ कालश्चराचरात्मकतथा चराणां जन्तूनाम्। अचराणां स्थावराणां स एवात्मा जीवभूतस्तेन चराचरात्मकत्वेन स एव विभूः प्रभुः। सर्वदर्शी सर्वमशेषं पश्यति तच्छीलः। हि यस्मादर्थे। चेष्टाव्याहृतिभिः, चेष्टाः स्पर्शनादिकाः क्रियाः। व्याहृतिर्व्याहरणं सम्भाषणम्। एताभिः शुभाशुभफलं सदसत्फलमर्थिनां पृच्छतां सन्दर्शयति प्रकटयति। तथा च पराशरः- **बृ.सं.,पृ-५९५**

इह खलु चराचराणां भूतानां कालोाऽन्तरात्मा सर्वदा सर्वदर्शी शुभाशुभैर्यः फलसूचकः स विशेषेण प्राणिनां स्वपराङ्गेषु स्पर्शव्याहारेङ्गितचेष्टादिभिर्निमितित्तैः फलमभिदर्शयति। तत्प्रयतो दैवज्ञोऽनुपहत-मतिरवधार्य स्वशास्त्रर्थमनुस्मृत्य यशोधर्मानुग्रहार्थमर्थिनां शुभाशुभानामर्थानां भावाभावमभिनिर्दिशेत् इति।

अधुना स्थाननिर्देशार्थमाह-

**स्थानं पुष्पसुहासिभूरिफलभृत्सुस्निग्धकृत्तिच्छदा-**

**सत्पक्षिच्युतशस्तरञ्जिततरुच्छायोपगूढं समम्।**

**देवर्षिद्विजसाधुसिद्धनिलयं सत्पुष्पसस्योक्षितं**

**सत्स्वादूदकनिर्मलत्वजनिताह्लादं च सच्छाद्वलम्।।२।।**

एवंविधं स्थानं पृच्छायां सच्छुभदमित्यर्थः। कीदृशम्। एवविधानां तरूणां वृक्षाणां छाययोपगूढं छन्नम्। कीदृशानाम् ? पुष्पाणि कुसुमानि तान्येव शोभनो हासो हसनं येषां ते पुष्पसुहासिनः। तथा भूरीणि प्रभूतानि फलानि धारयन्ति ये त` भूरिफलभृतः। तथा सूस्निग्धा कृत्तिस्त्वक् छदाः पर्णानि च येषां ते सुस्निग्धकृत्तिच्छदाः। तथाऽसत्पक्षिभिरनिष्टविहगैः काकोलूकादिभिश्चयुता रहितास्तथा शस्त्रंसंज्ञिताः प्रशस्तनामानो ये च पलाशपिप्पलन्यग्रोध-प्रभृतयस्तेषाम्। समं निम्नोन्नतत्वरहितम्। देवाः सुराः। ऋषयो मुनयः। द्विजा ब्राह्मणाः। साधवः सज्जनाः। सिद्धा देवयोनवः। एषां निलयं स्थानम्। तथा सत्पुष्पैः सुगन्धकुसुमैः सस्यैश्च धान्यादिभिरुक्षितं अन्तः सेचितं तच्छुभम्। तथा स्वादूदकनिर्मलत्वजनिताह्लादं च। स्वादु मृष्टं यदुदकं जलं निर्मलं प्रसन्नं तद्भावेन जनितमुत्पादितमाह्लादं चित्तसुखं येन तथाभूतेनोदकेन युक्तं सच्छाद्वातं शोभनदूर्वासंयुक्तं च सदिति। तथा च पराशरः- **बृ.सं.,पृ-५९६**

अथ पुष्पितफलितहरितस्निग्धत्वक्पत्रप्रशस्तनामाङ्कितसौम्यद्विजनिषेविततरुच्छायोपगूढे सस्य-कुसुमहरितमृदुशाद्वलसक्तमृष्टहृद्यप्रसन्नसलिलावकाशे देवर्षिसिद्धसाधुद्विजावासेप्राङ्मुखोत्तरोत्तरपूर्वाभिमुखो वा यः पृच्छेत्तस्य प्रार्थितार्थोपपत्तिमभिनिर्दिशेत् इति।।

अथाशुभस्थानप्रदर्शनार्थमाह-

**छिन्नभिन्नकृमिखातकण्टकिप्लुष्टरूक्षकुटिलैर्न सत्कुजैः।**
**क्रूरपक्षियुतनिन्द्यनामभिः शुष्कशीर्णबहुपर्णचर्मभिः।।३।।**

**श्मशानशून्यायतनं चतुष्पथं तथाऽमनोज्ञं विषमं सदोषर।**
**अवस्कराङ्गारकपालभस्मभिश्चितं तुषैः शुष्कतृणैर्न शोभनम्।।४।।**

**प्रव्रजितनग्ननापितारिपुबन्धनसौनिकैस्तथा श्वपचैः।**
**कितवयतिपीडितैर्युतमायुधमाध्वीकविक्रयैर्न शुभम्।।५।।**

**प्रागुत्तरेशाश्च दिशः प्रशस्ताः प्रष्टुर्न वाय्वम्बुयमाग्निरक्षः।**
**पूर्वाह्नकालेऽस्ति शुभं न रात्रौ सन्ध्याद्वये प्रश्नकृतोऽपराह्ने।।६।।**

दिश आशाः। प्रागुत्तरेशाः, पूर्वा उत्तरा ऐशानी , इन्द्रकुबेरशिवदिशः। पृच्छायां प्रशस्ताः शुभाः। प्रष्टुः प्रच्छकस्य तदभिमुखः शुभ इत्यर्थः। न वाय्वम्बुयमाग्निरक्षः, वायवीवारुणदक्षिणा-ग्नेयीर्नर्ऋताश्च न शुभाः। एता दिशः प्रष्टुः पूर्वाह्नकाले दिनस्य प्राग्भागसमये प्रश्नकृतः

प्रच्छकस्य शुभं शोभनफलमस्ति विद्यते। रात्रौ निशि सन्ध्याद्वये सायं प्रातरपराह्णे च न शोभनमिति। तथा च पराशरः- **बृ.सं.,पृ-५९८**

छिन्नभिन्नशुष्करूक्षवक्रजन्तुजग्धदग्धकण्टकिक्रव्यादद्विजनिषेविताप्रशस्तनामाङ्कितपाद पच्छाये श्मशानशून्यायतचत्वरोषररिपुनापिताधमद्यविक्रयशालासु नैर्ऋताग्नेययाम्यवारुणवायव्या-शाभिमुखः प्रचोद-येत्तस्येष्टमर्थमनर्थाय विन्द्यात्।। इति।। अपि च-

अथान्यच्छुभाशुभलक्षणमाह-

**यात्राविधाने हि शुभाशुभं यत्प्रोक्तं निमित्तं तदिहापि वाच्यम्।**

**दृष्ट्वा पूरो वा जनताहृतं वा प्रष्टुः स्थितं पाणिलेऽथ वस्त्रे।।७।।**

यात्राविधाने यच्छुभाशुभं कथितं प्रोक्तम्- सिद्धार्थकादर्शपयोऽञ्जनानि इति शुभदम्। कार्पासौषधकृष्णधान्यम् इत्यशुभदम्। तथा तत्र शाकुनं यन्निमित्तं प्रोक्तं तदिहापि प्रश्नसमये वाच्यं वक्तव्यम्। पुरोऽग्रतो वा दृष्ट्वाऽवालोक्य जनतया जनसमूहेन वा आहृतमानीतं प्रष्टुः प्रच्छकस्य पाणिले हस्ते वस्त्रे वा स्थितं दृष्ट्वा शुभमादिशेत्। पराशरः- **बृ.सं.,पृ-५९९**

अधुना अङ्गानि पुंसंज्ञकान्याह-

**अथाङ्गान्यूर्वोष्ठास्तनवृषणपादं च दशना**

**भुजौ हस्तौ गण्डौ कचगलनखाङ्गुष्ठमपि यत्।**

**सशङ्खं कक्षांस श्रवणगुदसन्धीति पुरुषे**

अथानन्तरं पुंसञ्ज्ञकान्यङ्गानि भवन्ति। ऊरु। ओष्ठौ दन्तच्छदौ। स्तनौ प्रसिद्धौ। वृषणौ मुष्कौ। पादौ चरणौ। दशना दन्ताः भुजौ बाहू। हस्तौ करौ। गण्डौ मुखकपोलौ। कचाः केशाः। गों कणठम्। नखाः कररुहाः। अङ्गुष्ठौ हस्तपादाङ्गुष्ठौ। सशङ्खं कक्षांसम्, सह शङ्खाभ्यां वर्तते यत्कक्षांसम्। शङ्खौ प्रसिद्धौ। कक्षौ बाहुमूलतलौ। अंसौ स्कन्धौ। श्रवणौ कर्णौ। गुदं पायुस्थानम्। सन्धिग्रहणेन सर्वाङ्गसन्धय उच्यन्ते। इत्येवं प्रकाराः सर्व एव पुरुषे पुंसि ज्ञेयाः। तथा च पराशरः-

अङ्गानि मुष्कस्तनपादोरुगुह्यभुजहस्तसमस्तकर्णासशङ्खदन्तौष्ठाङ्गुष्ठनखलगलण्डकेश-सन्धयः पुरुषाख्यानि इति।।

अथ स्त्रीसंज्ञकान्याह-

**स्त्रियां भ्रूनासास्फिग्वलिकटिसुलेखाङ्गुलिचयम्।।८।।**

**जिह्वा ग्रीवा पिण्डिके पार्ष्णियुग्मं जङ्घे नाभिः कर्णपाली कृकाटी।**

एतान्यङ्गानि स्त्रियो भवन्ति। भ्रू: प्रसिद्धा। नासा घ्राणम्। स्फिजौ प्रसिद्धौ। वली लेखा यथा त्रिवली। कटिः प्रसिद्धा। सुलेखा शोभनलेखा करमध्यस्था। अङ्गुलिचयोऽङ्गुलिसमूहः। जिह्वा रसना। ग्रीवा शिरोधर। पिण्डिके जङ्घयोः पश्चिमभागौ। पार्ष्णियुग्मं प्रसिद्धम्। जङ्घे प्रसिद्धे। नाभिस्तुन्दिः। कर्णपाली प्रसिद्धाः कृकाटी ग्रीवापश्चिमगभाः। एतानि स्त्रीसंज्ञानि। तथा च पराशरः- भ्रुवौ नासाग्रीवावलयोऽङ्गुलयो लेखा श्रोणिनाभी रसना जङ्घे पिण्डिके पालिस्फिजौ पार्ष्णिः कृकाटिकेति स्त्रीजज्ञानि।। इति।।

अथ नपुंसकाख्यान्याह-

**कत्रं पृष्ठं जत्रुजान्वस्थिपाश्वं हत्ताल्वक्षी मेहनोरस्त्रिकं च।।९।।**

**नपुंसकाख्यं च शिरो ललाटमाश्वाद्यसंज्ञैपरैश्चिरेण।**

**सिद्धिर्भवेज्जातु नपुंसकैर्नो रूक्षक्षतैर्भग्नकृशैश्च पूर्वैः।।१०।।**

एतीन नपुंसकाख्यानि। वक्त्रं मुखम्। पृष्ठं शरीरपश्चिमभागः। जत्रुरुरः कक्षयोः सन्धिः। जानुनी प्रसिद्धे। अस्थानि प्रसिद्धानि। पार्श्वे प्रसिद्धे। हृद्धदयम। तालुरास्यपृष्ठभागम्। अक्षिणी नेत्रे। मेहनं लिङ्गम्। उरो वक्षः। त्रिकं कटिपश्चिमभागो वलिप्रदेशाः।

शिरो मूर्घा। ललाट मुखपृष्ठम्। एतत्सर्वं नपुसंकाख्यं स्याद्भवेदिति। तथा च पराशरः **बृ.सं.,पृ-६००**

शिरोललाटमुखचिबुकपृष्ठजठरजत्रुजान्वस्थिपार्श्वहृदयकर्णपीठक्षिमेहनोरस्त्रिकताल्विति नपसुंकाख्यानि इति।

आश्वाद्यसंज्ञैरिति। आद्यसंज्ञैः प्रथमोक्तैः पुन्नामभिः स्पृष्टैराशुः क्षिप्रमेव सिद्धिः स्याद् भवेत्। अपरैस्तदनन्तरोक्तैःस्त्रीनामभिः। चिरेण सिद्धिर्भवेत्। नपुंसकैः स्पृष्टैनो जातु न कदाचिदपि सिद्धिः स्यात्।

रूक्षक्षतैरिति। नेत्यनुवर्तते। पूर्वैः पुन्नामभिः स्त्रीनामभिर्वा रूक्षैरस्निग्धैः। क्षतैः सम्प्रहारैः। भग्नै फ स्फुटितैः। कृशैरल्पमांसैः। न जातु न कदाचिदपिः सिद्धिर्भवेदिति। तथा च पराशरः- **बृ.सं.,पृ-६००**

तत्र पुन्नाम स्निग्धमुचितमनुपहतमक्षतमरोगमङ्गं स्पृष्टं दिग्देशकालव्याहारेष्ट-दर्शनैरुपपन्नं प्रष्टुः पृच्छार्थं सकलफलमभिनिवर्तयति। स्त्रीसञ्ज्ञमपि पूर्वोक्तलक्षणयुक्तं यत्नात् कालान्तरेण सफलम्। नपुसंकाख्यमकार्यसिद्धिमनर्थानां वाऽऽगमनं कुर्यात् इति। अपि च

अथ पृथक् फलनिर्देशार्थैमाह-

**स्पृष्टे वा चालिते वापि पादाङ्गुष्ठेऽक्षिरुग्भवेत्।**

**अङ्गुल्यां दुहितुः शोकं शिरोघाते नृपाद् भयम्।।११।।**

तत्र पृच्छायां पादाङ्गुष्ठे स्पृष्टे चालिते वा प्रष्टुरक्षिरुग् नेत्रपीडा भवेत् स्यादिति वदेत्। अङ्गुल्यां स्पृष्टायां दृहितृशोकं वदेत्। शिरोधाते शिरोऽभिहन्यमानं पृच्छेत्तदा नृपाद्राजतो भयमिति। तथा च पराशरः- **बृ.सं.,पृ-६००**

अथ पृथक्म पृथक्म फलनिर्देशः। तत्र पादाङ्गुष्ठे प्रचलयन स्पृष्ट्वा वा पृच्छेत् प्रष्टुश्चक्षुरोगं विनिर्दिशेत्।अङ्गुलिं स्पृष्टवा दुहितृशोकं शिरोऽभिहन्यमानं राजतो भयम् इति।।

अन्यदप्याह-

**विप्रयोगमुरसि स्वगात्रतः कर्पटाह्वतिरनर्थदा भवेत्।**

**स्यात् प्रियाप्तिरभिगृह्य कर्पटं पृच्छतश्चरणपादयोजितुः।।१२।।**

उरसि वक्षसि स्पृष्टैः प्रष्टुः केनचित् सह विप्रयोग वदेत्। स्वगात्रत आत्मीयशरीरात् कर्पटाह्वितः वस्त्रत्यागः अनर्थदा अनिष्टदा भवेत् स्यात्। कर्पटं वसनमभिगृह्य प्राप्य चरणं पादं द्वितीयचरणे योजयति तस्य पृच्छतः प्रष्टुः प्रियाप्तिः प्रियलाभः स्याद्भवेत्। तथा च पराशरः- **बृ.सं.,पृ-६०१**

अन्यदप्याह-

**पादाङ्गुष्ठेन विलिखेद् भूमिं क्षेत्रोत्थचिन्तया।**

**हस्तेन पादौ कण्डूयेत्तस्य दासीमयी च सा।।१३।।**

प्रष्टा क्षेत्रोत्थचिन्तया पादाङ्गुष्ठेन भूमिमवनिं विलिखेत्। हस्तेन करेण पादौ चरणौ कण्डूयेत्तदा चित्तस्य सा च चिन्ता दासीमयी दासीकृता। तथा च पराशरः- **बृ.सं.,पृ-६०१**

अन्यदप्याह-

**तालभूर्जपटदर्शनेंऽशुकं चिन्तयेत् कचतुषास्थिरभस्मगत्।**

**व्याधिराश्रयति रज्जुजालकं वल्कलं च समवेक्ष्य बन्धनम्।।१४।।**

तालवृक्षपत्रदर्शने भूर्जपटदर्शने वा प्रष्टा अंशुकं वस्त्रं चिन्तयेत्। कचतुषास्थिभस्मगं व्याधिराश्रयति। कचाः केशाः। तुषं शालिचर्म। अस्थि प्रसिद्धम्। भस्म प्रसिद्धमेव। एषामन्यतम् उपगतं प्रष्टारं व्याधिः पीडा। आश्रयति आवृणोति। रज्जुः प्रसिद्धा। जालकं यत्र पक्षिणो बध्यन्ते। वल्कलं त्वक्। एषामन्यतमे स्थितं तं वा समवेक्ष्यावलोक्य गृहीत्वा वा पृच्छेत् तदा बन्धनं वदेत्। तथा च पराशरः- **बृ.सं.,पृ-६०१**

अन्यदप्याह-

**पिप्पलीमरीचशुण्ठिवारिदै रोध्रकुष्ठवसनाम्बुजीरैः।**

**गन्धमांसिशतपुष्पया वदेत्पृच्छतस्तगरकेण चिन्तयेत्।।१५।।**

**स्त्रीपुरुषदोषपीडितसर्वार्थसुतार्थधान्यतनयानाम्।**

**द्विचपुष्पदक्षितीनां विनाशतः कीर्तितैर्दृष्टैः।।१६।।**

पिप्पलीनां दर्शने प्रदृष्टस्त्रीकृतां चिन्तां मरिचस्य पापपुरुषकृतां शृङ्गवेरस्य मृतचिन्ताम्। आजाज्याः सुतनाशकृतां रोध्रस्यार्थनाशकृतां मुस्तस्य सर्वनाशकृतां कुष्ठस्य सुतनाशकृतां वस्त्रस्यार्थ-नाशकृतां ह्रीवेरस्य धान्यनाशकृतां तगरस्य भूमिनाशकृतां शतपुष्पया चतुष्पन्नाशाय मांस्या द्विपदना-शकृताम् इति।।

अन्यदप्याह-

**न्यग्रोधमधुकतिन्दुकजम्बूप्लक्षाम्रबदरजातिफलैः।**

**धनकनकपुरुषलोहांशुकरूप्यौदुम्बराप्तिरपि करगैः।।१७।।**

न्यग्रोधादिजातीफलैस्तत्सम्भवैः फलैः करगैर्हस्तगैर्धनाद्याप्तिर्भवति। तत्र न्यग्रोधजातीफलैः प्रष्टुर्हस्तस्थैर्धनाप्तिर्वित्तलाभो भवेत्। मधुकफलैः कनकस्य प्राप्तिः। तिन्दुकफलैः परुषस्य द्विपदस्य प्राप्तिः। जम्बूफलैर्लोहिस्य। प्लक्षफलैरंशुकस्य वस्त्रस्य। आम्रफले रूप्यस्य। बदरफलैरौदुम्बरस्य ताम्रस्येति। तथा च पराशरः- **बृ.सं.,पृ-६०३**

अश्वत्थन्यग्रोधफलैर्हस्तस्थैः पृच्छेद्धनागममादिशेत्। मधुकौदुम्बरफलैः काञ्चनागमम्। द्विपदगमं तिन्दुकैः। वस्त्रागमं प्लक्षजैः। रूप्यस्यागममाम्रैः। ताम्रस्यागमं बदरैः। लोहस्या गमं जम्बूकैरिति वा इति।।

अन्यदप्याह-

**धान्यपरिपूर्णपात्रं कुम्भः पूर्णः कुटुम्बवृद्धिकरौ।**

**गजगोशुनां पुरीषं धनयुवतिसुहृद्विनाशकरम्।।१८।।**

धान्येन परिपूर्णं पात्रं भाजनं कुम्भः पूर्णश्च तौ दृष्टौ कुटुम्बवृद्धिकरौ गजगोशुनां पुरीषं यथासंख्यं धनयुवतिसृहृद्विनाशकरं भवति। गजस्य हस्तिन पुरीषं दृष्टं धनस्यैश्वर्यस्य विनाशकरम्। गोपुरीषं गोमयं युवतीनां स्त्रीणां विनाशकरम्। शुनः पुरीषं सुहृदां मित्राणां विनाशकरमिति। तथा च पराशरः- **बृ.सं.,पृ-६०३**

धान्यपात्रपूर्णोदकुम्भदर्शने कुटुम्बवृद्धिं जानीयात्। हस्तिना द्रव्यागमम्। हस्तिशकृतो भ्रंशमैश्वर्यस्य वा। गोमयस्य स्त्रीव्यभिचारम्। शुनः सुहृद्विनाशम् इति।।

अन्यदप्याह-

**पुशहस्तिमहिषपङ्कजरजतव्याघ्रैर्लभेत सन्दृष्टैः।**

**अविधननिवसनमलयजकौशेयाभरणसङ्घातम्।।१९।।**

पश्वादिभिः पृच्छासमये सन्दृष्टैरवलोकितैरव्याद्याभरणानां सङ्घातं समूहं प्रष्टा लभते। तत्र पशुदर्शने आविकस्यौर्णिकस्य कम्बलादेर्लाभः। हस्तिनः करिणो दर्शने धनागमः। महिषस्य दर्शने निवसनस्य क्षौमवस्त्रस्य। पङ्कजस्य पद्मस्य दर्शने मलयजस्य चन्दनस्य। रजतस्य रूप्यस्य दर्शने कौशेयवस्त्रस्य। व्याध्रस्य सन्दर्शने आभरणागमः। पराशरः- **बृ.सं.,पृ-६०४**

महिषस्य क्षौमवस्त्रागमम्। मणिभाण्डस्य गजवाजिनामौर्णिकानाम्। व्याघ्रस्या-भरणागमम्। पङ्कजस्य रक्तवस्त्रवन्दनलाभम्। रूप्यस्य कौशेयवस्त्राणाम् इति।।

अन्यदप्याह-

**पृच्छा वृद्वाश्रावकसुपरिव्राड्दर्शने नृभिर्विहिता।**

**मित्रद्युतार्थभवा गणिकानृपसूतिकार्थकृता।।२०।।**

वृद्धश्रावकः कापालिकस्तद्दर्शने तदालोकने नृभिः पुम्भिर्मित्रद्युतार्थभवा पृच्छा विहिता कृता मित्रार्थ द्यूतार्थं वा कृता। सुपरिव्राड्दर्शने यत्याद्यवलोकने लिङ्गिनो वा गणिकानृप-सूतिकार्थकृता पृच्छा। गणिका वेश्या। नृपो राजा। सूतिका प्रसूता स्त्री। तत्कृता।।

अन्यदप्याह-

**शाक्योपाध्यायार्हन्निर्ग्रन्थिनिमित्तनिगमकैवर्तैः।**

**चौरचमूपतिवणिजां दासीयोधापणस्थवध्यानाम्।।२१।।**

शाक्यादीनां दर्शने चौरादीनां पृच्छा। शाक्यदर्शने चौरकृता। उपाध्यायदर्शने चमूपतिकृता सेनापतिकृता। अर्हद्दर्शने वणिक्कृता। निर्ग्रन्थिदर्शने दासीकृता। नैमित्तिकस्य दैवविदो दर्शने योधकृता। निगमदर्शने आपणस्थस्य श्रेष्ठिनः कृता। कैवर्तस्य धीवरस्य दर्शने वध्यकृता चिन्ता इति।।

अन्यदप्याह-

**तापसे शौण्डिके दृष्टे प्रोषितं पशुपालनम्।**

**हृद्गतं प्रच्छकस्य स्यादुञ्छवृतौ विपन्नता।।२२।।**

निर्ग्रन्थिदर्शने दासीपृच्छा। वृद्धाश्रावकदर्शने मित्रद्यूतकृता वा। शाक्यस्य चौरकृता। परिव्राजकस्य नृपसूतिकागणिकार्था वा। उपाध्यायस्य चमूपतिकृता। नैगमस्य श्रेष्ठिकृता। नैमित्तिकस्य योधार्थ। अर्हतो वाणिजिकार्था। उञ्छवृत्तिनो विपन्नार्था। तापसस्य प्रोषितार्था। शौण्डिकस्य पशुपालनार्था। कैवर्तस्य वध्यघातकृता इति।।

अन्यदप्याह-

**इच्छामि प्रष्टुं भण पश्यत्वार्यः समादिशेत्युक्ते।**

**संयोगकुटुम्बोत्था लाभैश्वर्योद्गता चिन्ता।।२३।।**

इच्छामीत्याद्युके यथासङ्ख्यं संयोगादिकृता चिन्ता ज्ञेया। इच्छामि प्रष्टुमिति भणेति उक्ते संयोगकुटुम्बकृतां चिन्तां वदेत्। पश्यत्वार्य इत्युक्ते लाभोद्गतां लाभार्थकृतां चिन्तां समादिशेत्। समादिशेत्युक्ते ऐश्वर्योद्गतां चिन्तामिति।।

अन्यदप्याह-

**निर्दिशेत गदिते जयाध्वजा प्रत्यवेक्ष्य मम चिन्तितं वद।**

**आशु सवर्जजमध्यगं त्वया दृश्यतामिति च बन्धुचौरजा।।२४।।**

निर्दिशेत गदिते उक्ते पृच्छा जयाध्वजा। जयार्थं जाता कृता। अध्वजा वा। प्रत्यवेक्ष्य वेति विचार्य मम चिन्तितं हृद्गतं वदेत्युक्ते बन्धुकृता। सर्वजनमध्यगं प्रष्टारमेवं वक्ति। आशु क्षिप्रमेव त्वया च दृश्यतामिति चौरजा तस्करकृता चिन्ता। तथा च पराशरः- **बृ.सं.,पृ-६०५**

आदिशार्येत्येवं पृच्छेदैश्वर्यचिन्ताम्। भणेत्युक्ते कुटुम्बकृताम्। इच्छामि प्रष्टुमिति संयोगकृताम्। पश्यत्वार्य इति। लाभकृताम्। निर्दिशेत्यध्वकृताम्। जयपृच्छां वा। पृच्छामि

तावदाचार्येति वा सम्यक् मां प्रत्यवेक्षस्वेति बन्धुकृताम्। अथ काले निःश्वसनान्तः सहसा बहुजनमध्यगतं दृश्यतामिति पृच्छेदिति चौरचिन्तां जानीयात्।।

अथ चौरविज्ञानमाह-

**अन्तःस्थेऽङ्गे स्वजन उदितो बाह्यजे बाह्य एव**

**पादाङ्गुष्ठाङ्गुलिकलनया दासदासीजनः स्यात्।**

**जङ्घे प्रेष्यो भवति भगिनी नाभितो हत्स्वभार्या**

**पाण्यङ्गुष्ठाङ्गुलिचयकृतस्पर्शने पुत्रकन्ये।।२५।।**

**मातरं जठरे मूर्ध्नि गुरुं दक्षिणवामकौ।**

**बाहू भ्राताऽथ तत्पत्नी स्पृष्टवैव चौरमादिशेत्।।२६।।**

जठरे उदरे स्पृष्टे मातरं स्वजननीं चौरीम्। मूर्ध्नि शिरसि स्पृष्टे गुरुम्। दक्षिणवामकौ बाहू तत्स्पर्शने यथासङ्ख्यं भ्राता तत्पत्नी। दक्षिणबाहुस्पर्शने। भ्राता वामे तत्पत्नी। एवमङ्गस्पर्शने चौरं तस्करमादिशेद्वदेत्। तथा च पराशरः- **बृ.सं.,पृ-६०६**

बाह्याङ्गस्पर्शने बाह्यचौरम्। अन्तः स्वकृतम्। तत्र पादाङ्गुष्ठे दासम्। अङ्गुलीषु दासीम्। जङ्घयोः प्रेष्यम्। जठरे मातरम्। हस्ताङ्गुलिषु दुहितरम्। अङ्गुष्ठे सुतम्। नाभ्यां भगिनीम्। गुरुं शिरसि। हृदि भार्याम्। दक्षिणबाहौ भ्रातरम्। वामे भ्रातृभार्याम् इति।।

अथापहृतस्य लाभज्ञानमाह-

**अन्तरङ्गमवमुच्य बाह्यगस्पर्शनं यदि करोति पृच्छकः।**

**श्लेष्ममूत्रशकृतस्त्यजत्यथो पातयेत् करतलस्थवस्तु चेत्।।२७।।**

**भृशमवनामिताङ्गपरिमोटनतोऽप्यथवा जनधृतारिक्तभाण्डमवलोक्य च चौरजनम्।**

**हृतपतितक्षतास्मृतविनष्टविभग्नगतोन्मुषितमृताद्यनिष्टरवतो लभते न हृतम्।।२८।।**

अथवा भृशमत्यर्थमवनामिताङ्ग अवनामितावयवाङ्गानामेव परिमोटनं चटचटा-शब्दमृत्पाद्यति। तथा तत्कालं जनधृतं लोकगृहीतं रिक्तभाण्डमवलोक्य दृष्टवा। तथा चौरजनं तस्करजनमव-लोक्य, अथवा हृतः पतितः क्षतः अस्मृतो विनष्टो विभग्नो गत उन्मुषितो मृतः। एषामनिष्टरवतः शब्दश्रवणात्। आदिग्रहणात् कष्टदुष्टानिष्टशीर्णशब्दश्रवणाद् हृतं प्रहृतं न लभत इति। तथा च पराशरः- **बृ.सं.,पृ-६०७**

अभ्यन्तरंग स्पष्ट्वा बाह्यं स्पृशेन्निर्हरणं वा श्लेष्मपुरीषमूत्रत्यागं कुर्याद्धस्ताद्वा किञ्चित् पातयेत्। गात्राणि वा स्फोटयेत्। क्षतहृतपतितमुषितविस्मृतनष्टकष्ट-दुष्टानिष्टभग्नगतजीर्ण-शब्दप्रादुर्भावो वा स्यात्। रिक्तभाण्डतस्कराणां दर्शने न प्रष्टा लाभं विन्द्यात् इति।।

अथ पीडार्तानां मरणज्ञानामाह-

**निगदितमिदं यत्तत्सर्वं तुषस्थिविषादिकैः।**

**सह मृतिकरं पीडार्ताना समं रुदितक्षतैः।**

अन्तरङ्गंवमुच्येति आरभ्य यदिदं नष्टचिन्तायां निगदितमुक्तम्। तत्सर्वं तुषास्थिविषादीकैः सह साकं तथा रुदितक्षतैः सह समं पीडार्तानां रोगिणां मृतिकरं मरणं करोति। आदिग्रहणा-च्छिन्नमृतिजग्धपाटितशब्दैरिति। तथा च पराशरः- **बृ.सं.,पृ-६०७**

अथ रोगभिघातच्छर्दमूत्रपुरीषोत्सर्गे केशास्थिभस्मतुषविषादीनामशुभानां दर्शने तथा छिन्न-भिन्नव्यापन्नहतमृतावक्षतजग्धबद्धपाटितरुदितशब्दश्रवणे वा रोगिणां मरणमादिशेत् इति।।

अथ भोजनज्ञानमाह-

**अवयवमपि स्पृष्टवाऽन्तः स्थं दृढं मरुदाहरे-**

**दतिबहु तदा भुक्त्वाऽन्नं संस्थितः सुहितो वदेत्।।२९।।**

अन्तः स्थमभ्यन्तरस्थितमवयवं स्पृष्टवा मरुद्वायुमाहरेदुद्गिरन्। पृच्छेत्तदा प्रच्छकोऽतिबहु अतिप्रभूतमन्नं भुक्त्वा सुहितोऽग्नितृप्तः स्थित इति वदेत्।।

अन्यदप्याह-

**ललाटस्पर्शनाच्छूकदर्शनाच्छालिजौदनम्।**

**उरः स्पर्शात् षष्टिकाख्यं ग्रीवास्पर्शे च यावकम्।।३०।।**

ललाटस्पर्शनात् शूकधान्यानां वा दर्शनाच्छादिलजौदनं प्रच्छकेन भुक्तमिति वदेत्। उरः सपर्शात् षष्टिकाख्यं धान्यविशेषान्नं ग्रीवास्पर्शे च ग्रावकं यवान्नम्।।

अन्यदप्याह-

**कुक्षिकुचजठरजानुस्पर्शे माषाः पयस्तिलयवाग्वः।**

**आस्वादयते चोष्ठौ लिहते मधुरं रसं ज्ञेयम्।।३१।।**

कुक्षिस्पर्शनु माषा मुक्ताः कुचौ स्तनौ। तत्पर्शने पयः क्षीरौदनम्। जठरमुदरम्। तत्पसर्शने तिलोदनम्। जानुस्पर्शने यवागूः यावकम्। ओष्ठावास्वादयते लिहते वा प्रष्टा पृच्छति तदा तेन मधुरं रसं भुक्तामित ज्ञेयम्।।

अन्यदप्याह-

**विसृक्कै स्फोटयेज्जिह्वामाम्ले वक्त्रं विकूणयेत्।**

**कटुकेऽथ कषायेऽऽथ हिक्केत् ष्ठीवेच्च सैन्धवे।।३२।।**

जिह्वां रसनां विसृक्के स्फोटयेत् प्रष्टा तदा तेनाम्बलं भुक्तम्। वक्त्रं मुखं विकूणयेत्। कटुके भुक्ते। असौ प्रच्छकः कषाये भुक्ते हिक्केन्। सैन्धवे लवणे भुक्ते ष्ठीवेत्।।

अन्यदप्याह-

**श्लेष्मत्यागे शुष्कतिक्तं तदल्पं श्रुत्वा क्रव्यादं वा प्रेक्ष्य वा मांसमिश्रम्।**

**भ्रूगण्डौष्ठस्पर्शने शाकुनं तद् भुक्तं तेनेत्युक्तमेतन्निमित्तम्।।३३।।**

श्लेष्मपरित्यके शुष्कं नीरसं तिक्तं तदल्पं स्तोकं च भुक्तम्। क्रव्यादं मांसाशिनं प्राणिनं श्रुत्वा प्रेक्ष्य दृष्टवा तन्मांसमिश्रं भुक्तम्। भ्रुगण्डौष्ठस्पर्शने शाकुनं मांसम्। तेन प्रष्ट्रा तद्भुक्तम्। इत्युक्तमेतत्कथितं निमित्तं चिह्नम्।।

अन्यदप्याह-

**मूर्धगलकेशहनुशङ्ककर्णजङ्घ बस्तिं च स्पृष्ट्वा।**

**गजमहिषमेषशूकरगोशशमृगमहिषमांसयुग्भुक्तम्।।३४।।**

मूर्धादिस्पर्शने यथाक्रमं गजादिमांसं भुक्तं वक्तव्यम्। मूर्धा शिरस्तत्स्पर्शने गजमांसं कौञ्जरम्। गलस्पर्शने माहिषम्। केशस्पर्शने मेषमांसमौरभ्रम। हनुस्पर्शने शूकरमांसम्। शङ्कस्पर्शने गोमांसम्। कर्णस्पर्शने शशमांसम्। जङ्घास्पर्शने मुगमांसम्। बस्तिस्पर्शने महिषमांसयुतमेव भुक्तम्।।

अन्यदप्याह-

**दृष्टे श्रुतेऽप्यशकुने गोधामत्स्यामिषं वदेद्भुक्तम्।**

**गर्भिण्या गर्भस्य च निपतनमेवं प्रकल्पयेत्प्रश्ने।।३५।।**

अशकुने दृष्टे अवलोकिते वा दुर्निमित्ते गोधामिषं मत्स्यामिषं वा भुक्तं वदेद् ब्रूयात्। एवमेव गर्भपुच्छायामशकुने दुर्निमित्ते श्रुते दृष्टे वा गर्भिण्याः स्त्रियो गर्भनिपतनं प्रकल्पयेद् निर्दशेदिति। तथा च पराशरः- **बृ.सं.,पृ-६१०**

**पुंस्त्रीनपुंसकाख्ये दृष्टेऽनुमित्ते पुरःस्थिते स्पृष्टे।**

**तज्जन्म भवति पानान्नपुष्पफलदर्शने च शुभम्।।३६।।**

**अङ्गुष्ठेन भ्रूदरं वाङ्गुलिं वा स्पृष्ट्वा पृच्छेद्गर्भचिन्ता तदा स्यात्।**

**मध्वाज्याद्यैर्हेमरत्नप्रवालैरग्रस्थैर्वा मातृधात्र्यात्मजैश्च।।३७।।**

स्त्री स्वाङ्गुष्ठेन भ्रूयगमुदरमङ्गुलिं वा स्पृष्ट्वा पृच्छेत्तदा गर्भः स्याद्भवेत्। अथवा अग्रस्थैः पुरोऽवस्थितैः। मध्वाज्याद्यैः। मधु माक्षिकम् आज्यं घृतम्। आदिग्रहणात् पुंनामभिः मातृधात्र्यात्मजैश्च माता जननी , धात्री स्तनदायिनी, आत्मजः पुत्रः। एतैरप्यग्रस्थैर्गर्भपृच्छामेव जानीयात्। तथा च पराशरः- **बृ.सं.,पृ-६११**

अथ स्त्री भ्रुवौ जठरमङ्गुष्ठे वाऽङ्गुलिं स्पृष्ट्वा पृच्छेद् गर्भपृच्छां जानीयात्। तथा फलच्छायावृक्ष-प्रवालाङ्कुरमधुघृतहेमगर्भप्राजापत्ये वा मातृधात्रीपुत्रनिदर्शनशब्दप्रादुर्भावे गर्भ-पृच्छामेव इति।।

अन्यदप्याह-

**गर्भयुता जठरे करगे स्याद् दुष्टनिमित्तवशात्तदुदासः।**

**कर्षति तज्जठरं यदि पीठोत्पीडनतः करगे च करेऽपि।।३८।।**

जठरे उदरे करगे हस्तेन स्पृष्टे स्त्रीगर्भयुता स्याद्भवेत्। तस्मिन्नेव पृच्छासमये दुष्टनिमित्तवशाद् दुष्टामित्तदर्शनात्। क्षतक्षुभितभग्नविनष्टदग्धक्षीरादिदर्शने श्रवणात्तदुदासो भर्गपतनं भवति। अथवा तज्जठरं पीठोत्पीडनतः पीठमर्दनं कृत्वा कर्षति कण्डूयेत्। करगे च करेऽपि हस्तं हस्तेन वा अवलम्ब्य पृच्छपि तदापि तदुदास इति।।

अथ गर्भग्रहणकालज्ञानमाह-

**घ्राणाया दक्षिणे द्वारे स्पृष्टे मासोत्तरं वदेत्।**

**वामेऽब्दौ कर्ण एवं मा द्विचतुर्ध्नः श्रुतिस्तने।।३९।।**

**वेणीमूले त्रीन् सुतान् कन्यके द्वे कर्णे पुत्रान् पञ्च हस्ते त्रयं च।**

**अङ्गुष्ठान्ते पञ्चकं चानुपूर्व्या पादाङ्गुष्ठे पार्ष्णियुग्मेऽपि कन्याम्।।४०।।**

वेणी केशकलापः। तन्मूले पृच्छायां स्पृष्टे त्रीन् सुतान् द्वे कन्यके जनयिष्यसीति वक्तव्यम्। कर्णे कर्णयुग्मे पुत्रान् पञ्च। हस्ते हस्युग्मे त्रयम्। कनिष्ठाङ्गुलेनाऽऽरभ्याङ्गुष्ठान्तं यावदानुपूर्व्यो क्रमेण पुत्रपञ्चकं सूते। तत्र कनिष्ठास्पर्शने एकं पुत्रम्। सुतद्वयमनामास्पर्शने। मध्यमायां त्रीन्। तर्जन्यां चतुरः। अङ्गुष्ठे। पञ्च। पादाङ्गुष्ठस्पर्शे पार्ष्णियुग्मेऽपि स्पृष्टे कन्यामेकां सूति इति।।

अन्यदप्याह-

**सव्यासव्योरुसंस्पर्शे सूते कन्यासुतद्वयम्।**

**स्पृष्टे ललाटमध्यान्ते चतुस्त्रितनया भवेत्।।४१।।**

सव्यं दक्षिणमुरु, तत्संस्पर्शे कन्याद्वयं सुतद्वयं च जनयति। अपस्वये वामेऽप्येवमेव। ललाटमध्यान्ते स्पृष्टे यथासंख्यमढ। ललाटमध्ये स्पृष्टे चतुस्तनया चतुष्पुत्रा। ललाटान्ते स्पृष्टे त्रितनया भवेत् स्यादितति। तथा च पराशरः- **बृ.सं.,पृ-६१२**

अथ विशेषः वेणीमूलमभिगृह्य पृच्छेत्तदा द्वे कन्यके त्रीन पुत्रान् जनयिष्यसीति ब्रूयात्। ललाटमध्यं स्पृशन्ती चत्वार्यपत्यानि। ललाटान्तं त्रीणि। कर्णयोः संस्पर्शे पञ्चापत्यानि। दक्षिणोरुसंस्पर्शे द्वौ पुत्रौ द्वे च कन्यके जनयिष्यसीति। वामस्य तिस्त्रः कन्या द्वौ पुत्रौ। पादाङ्गुष्ठस्य कन्यकैका। पार्ष्ण्योः कन्यककैकैवेति इति।।

अथ गर्भिण्याः कस्मिन्नक्षत्रे भविष्यतीति ज्ञानार्थमाह-

**शिरोललाटभ्रूकर्णगण्डं हनुरदा गलम्।**

**सव्यापसव्यस्कन्धश्च हस्तौ चिबुकनालकम्।।४२।।**

**उरः कुचं दक्षिणमप्यसव्यं हत्पार्श्वमेवं जठरं कटिश्च।**

**स्फिक्पायुसन्ध्यूरुयुगञ्च जानू जङ्घेऽथ पादाविति कृत्तिकादौ।।४३।।**

सूत इत्यनुवर्तते। पृच्छासमये गर्भिण्याः शिरप्रभृतिसंस्पर्शे कुत्तिकादौ नक्षत्रे जनम विन्द्यात्। तत्र शिरो मूर्धा तत्संस्पर्शे कृत्तिकानक्षत्रे जन्म भवति गर्भिणी सूते। एवं ललाटे रोहिण्याम्। भ्रुवौ मृगशिरसि। कर्णयोरार्द्रायाम्। गण्डयोः पुनर्वसौ। हन्वोस्तिष्ये। रदा दन्ता-स्तेष्वाश्लेषायाम्। गले ग्रीवायां मघासु। सव्ये दक्षिणस्कन्धस्पर्शे पूर्वफल्गुन्याम्। असपव्ये वामस्कन्धसंस्पर्शे उत्तरफल्गुन्याम्। हस्तयोः संस्पर्शे हस्ते। चिबुके आस्यादः चित्रायाम्। नालके कण्ठे स्वातौ। उरसि वक्षसि विशाखायाम्। कुचौ स्तनौ तत्र दक्षिणस्तनसंस्पर्शने अनुराधायाम् अपसव्ये वामे ज्येष्ठासु। हृदि मूले। पार्श्वद्वयमेवं प्राग्वत्। तेन दक्षिणे पार्श्वे पूर्वाषाढायाम्। वाम

उत्तराषाढायाम्। जठरे श्रवणे। कटयां धनिष्ठायाम्। स्फिग्गुदयोः सन्धिस्पर्शने शतभिषजि। दक्षिणोरुस्पर्शने पूर्वभद्रपदायाम्। वामोरुस्पर्शने उत्तरभद्रपदायाम। जान्वो रेवत्याम्। जङ्घयोरश्विन्यास्। पादयोर्भरण्यामिति। तथा च पराशरः- **बृ.सं.,पृ-६१३**

अथोपसंहरार्थमाह-

**इति निगदितमेतद् गात्रसंस्पर्शलक्ष्म प्रकटमभिमताप्त्यै वीक्ष्य शास्त्राणि सम्यक्।**

**विपुलमतिरुदारो वेत्ति यः सर्वमेत्न्नरपतिजनताभिः पूज्यतेऽसौ सदैव।।४४।।**

इतिशब्द उसंहारे प्रकारे वा। एतद्गत्रसंस्पर्शलक्ष्म अवयवस्पर्शनलक्षणं प्रकटमतिस्फुटं विरचितम्। किं कृत्वा सम्यगागमतः शास्त्राणि गर्गपराशरादिभिर्विरचितानि वीक्ष्य दृष्ट्वा। किमर्थम्? अभिमताप्तयै अभीष्टार्थसिद्धये। यो विपुलमतिर्विस्तीर्णबुद्धिरुदारो ह्यलब्धं सर्वं निरवशेषमेतद्वेत्ति जानाति असौ नरपतिभिर्नृपैर्जनताभिर्जनसमूहेदैवज्ञः सर्वदैव सर्वकालं पूज्यते अभ्यर्च्यत इति।।

## १३. पिटकलक्षणाध्यायः

अतः परमपि केचित् पिटकलक्षणं पठन्ति। तदप्यस्माभिर्व्याख्यायते। तत्र ब्राह्मणादीनां वर्णानां पिटकलक्षणमाह-

**सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटका थे।**

**ते क्रमशः प्रोक्तफला वर्णानां नाग्रजातानाम्।।१।।**

विप्रादीनां ब्राह्मणादीनां चतुर्णां वर्णानां क्रमेण परिपाटया, पिटकाः सितरक्तपीतकृष्णाः श्वेतलोहितहारिद्रकृष्णाः। ब्राह्मणानां सिताः, क्षत्रियाणां रक्ताः, वैश्यानां पीताः, शूद्राणां कृष्णा इति। एवं क्रमेण ये पिटका उक्तस्ते क्रमशोऽनुक्रमेण वर्णानां प्रोक्तफलाः कथितफलाः, किन्तु नाग्रजातानां ब्राह्मणवर्जितानाम्। एतदुक्तं भवति- सिता ब्राह्मणानां फलदा नान्ये। सितरक्ताः क्षत्रियाणां नान्ये। सितरक्तपीता वैश्यानां नान्ये। सितरक्तपीतकृष्णाः शूद्राणामिति।।

अधुना विशेषेण फलमाह-

**सुस्निग्धव्यक्तशोभाः शिरसि धनचयं मूर्ध्नि सौभाग्यमारा-**

**द्दौभाग्यं भ्रूयुगोत्थाः प्रियजनघटनामाशुं दुःशीलतां च।**

**तन्मध्योत्थाश्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं**

**प्रव्रज्यां शङ्खदेशेऽश्रुजलनिपतनस्थानगा रान्ति चिन्ताम्।।२।।**

शिरसि मूर्धनि पिटकाः सुस्निग्धा अरूक्षास्तथा व्यक्तशोभा व्यक्ता स्फुटा शोभा कान्तिर्येषां ते तथाभूता धनचयं वित्तसमूहं कुर्वन्ति। मूर्ध्नि मुखपृष्ठे केशान्ते आराच्छीघ्रमेव सौभाग्यम्। भ्रूयुगोत्था भ्रूयुगलोत्पन्ना दौर्भाग्यं दुर्भाग्यत्वम। तन्मध्योत्था भ्रूसङ्गमजनिता प्रियजनघटनामिष्टबन्धुसंयोगं दुःशीलतां दृष्टशीलत्वं चाशु शीघ्रमेव कुर्वन्ति। नयनपुटगता अक्षिकोशजाताः शोक् ददति। नेत्रयोश्चक्षुषेरिष्टदुष्टिमिष्टदर्शनम्। शङ्खदेशे शङ्खस्थाने प्रव्रज्याम्। अश्रुजलनिपतनस्थानगा अश्रुजलं यत्र निपतति तत्र गताश्चिन्तां रान्ति ददति। तथा च पराशरः- **बृ.सं.,पृ-६१६**

अथ पिटकाः सितरक्तपीतकृष्णा द्विजादीनां वर्णानां क्रमात् स्थानवर्णविशेषणो-त्तरोतरफलदा भवन्ति। तत्र मूर्ध्नि सुव्यक्तः सुस्निग्धः सुवर्णोऽभिषेकागमनं कुर्यात्। शिरसि धनागमम्। केशान्ते सौभाग्यम् ललाटे धनसञ्चयम्। भ्रुवोर्दौर्भाग्यम्। सङ्गमे दौः

शील्यमिष्टसङ्गमं च। नेत्रपुटयोः शोकम्। नेत्रयोरिष्टदर्शनम्। शङ्खदेशे प्रव्रज्याम्। चिन्तामश्रुपाते इति।।

अन्यदप्याह-

**घ्राणागण्डे वसनसुतदाश्चौष्ठयोरन्नलाभ**

**कुर्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे।**

**हन्वोरेवं गलकृतपदा भूषणान्यन्नपाने**

**श्रोते तद्भूषणगतमपि ज्ञानमात्सस्वरूपम्।।३।।**

घ्राणागण्डे यथाक्रमं वसनसुतदः। तेन घ्राणायां नासादेशे वसनदा वस्त्रलाभप्रदाः पिटकाः। गण्डे सुतदाः पुत्रदाः। ओष्ठयोरन्नलाभमन्नागमं भोजनावाप्तिं कुर्यूः। चिबुकतलमा-स्योधोभागः। तत्र गताः स्थितास्तद्वदन्नदा एव। ललाटे भूरि वित्तं प्रभूतं धनम्। हन्वोरेवं तत्र स्थिताः प्रभूतधनदा एव। गलकृतपदा गले कण्ठे कृतं पदं यैः। तत्र स्थितां इत्यर्थः। भूषणानि आभरणानि अन्नपाने च शोभने ददति। श्रोत्रे कर्णप्रदेशे। तद्भूषणगणमपि। तदिति कर्णपरामर्श-स्तद्भूषणगणस्य कर्णालङ्कारसमूहस्यागमं तथा आत्मस्वरूपमध्यात्मज्ञानं प्राप्नोतीति। तथा च पराशरः- **बृ.सं.,पृ-६१७**

गण्डे सुतलाभम्। नासावंशे वस्त्रलाभम्। चिबुकाधरेष्वोष्ठाधरेष्वन्नम्। अभिहन्वोर्धना-गमम्। गले चान्नपानमाभरणं च। शिरफ सन्धौ ग्रीवायां चोपधातं शस्त्रेण कर्णयोस्तद्भूषण-मात्मश्रवणं च इति।।

अन्यदप्याह-

**शिरः सन्धिग्रीवाहृदयकुचपार्श्वोरसि गता अयोघातं घातं सुततनयलाभं शुचमपि।**

**प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्विनाशं कक्षोत्था विदधति धनानां बहुमुखम्।।४।।**

शिरः सन्ध्यादिषु गताः पिटका यथाक्रममयोघातादिकं कुर्वन्ति। तेन शिः सन्धावयोघातं शस्त्रपीडाम्। ग्रीवायां घातमुपतापम्। हृदये सुतलाभम्। कुचयोः स्तनयोश्च तनयलाभं पुत्रप्राप्तिम्। पार्श्वयोः शुचमपि शोकम्। उरसि वक्षसि गताः प्रियप्राप्तिमिष्टलाभम्। स्कन्धे अंसेऽपि असकृतः पुनः पुनः भिक्षार्थमटनं परिभ्रमणम्। अथशब्दश्चार्थे। कक्षोत्थाः कक्षयोः सम्भूतां धनानां वित्तानां बहुमुखमनेकप्रकारं विनाशं क्षयम्। विदधति कुर्वन्ति।।

अन्यदप्याह-

**दुःखशत्रुनिचयस्य विनाशं पुष्ठबाहुयुगजा रचयन्ति।**

**संयमं च मणिबन्धनजाता भूषणाद्यमुपबाहुयुगोत्था :।।५।।**

पृष्ठबाहुयुगजा यथाक्रमं दुःखशत्रुनिचयस्य विनाशं रचयन्ति कुर्वन्ति। तत्र पुष्ठजाता दुःखनिचयस्य दुःखसमूहस्य विनाशं कुर्वन्ति। बाहुयुगजाः शत्रुनिचयस्यारिसमूहस्य विनाशम्। मणिबन्धन-जाताः प्रकोष्ठास्थानोत्पन्नाः संयमं हस्तबन्धं कुर्वन्ति। उपबाहुयुगोत्थाः प्रबाह्वोर्जाता भूषणाद्यमाभरण-वस्त्रान्नदानं कुर्वन्ति। तथा च पराशरः- **बृ.सं.,पृ-६१७**

पार्श्वयोः शोकम्। उरसीष्टसङ्गमम्। स्कन्ध्योर्भैक्ष्यचर्याम्।कक्षयोरर्थक्षमय्। ह्स्तनयोः पुत्र-लाभम्। पृष्ठे दुःखशमनम्। अरिविनाशं बाह्वोः। प्रबाह्वोराभरणम्। मणिबन्धने नियमनम् इति।।

अन्यदप्याह-

**धनाप्तिं सौभाग्यं शुचमपि कराङ्गुल्युदरगाःसुपानान्नं नाभौ तदध इह चौरेर्धनहृतिम्।**

**धनं धान्यं बस्तौ युवतिमथ मेढ्रे सुतनयान् धनु सौभाग्यं वा गुदवृषणजाता विदधति।।६।।**

कराङ्गुल्युदरगाः पिटका यथाक्रमं धनात्यादिकं विदधति कुर्वन्ति। तत्र करगता धनाप्तिं वित्तागमम्। अङ्गुलिगताः सौभाग्यम्। उदरगताः शुचं शोकम्। नाभौ सुपानान्नं शोभनमन्नपानम्। तदधो नाभेरधोभागे इहास्मिन् पिटकलक्षणे चौरेस्तस्करैर्धनहृतिं वित्तहरणम्। बस्तौ धनं धान्यम्। मेढ्रे शिश्ने। युवतिं स्त्रियम्। सुतनयान् शोभनपुत्रान् विदधति। धनं सौभाग्यं वा गुदवृषणजाताः गुदजाता अपानस्थानोद्भवा धनं वित्तम्। वृषणजाताः सौभाग्यमिति। तथा च पराशरौंड

पाणौ धनागमम्। सौभाग्यमङ्गुलिषु। शोकमुदरे। अन्नपानावाप्तिं च नाभौ। चौरैरर्थहरणं तदधरे। धनधान्यावाप्तिं बस्तौ। सौभाग्यमर्थलाभं च वृषणयोः। पुत्रजन्म स्त्रीलाभं मेहने। गुदे सौभाग्यम्।। इति।।

अन्यदप्याह-

**ऊर्वोर्यानाङ्गनालाभं जान्वोः शत्रुजनात् क्षतिम्।**

**शस्त्रेण जङ्घयोर्गुल्फेऽध्वबन्धक्लेशदायिनः।।७।।**

ऊर्वोर्यानलाभं वाहनाप्तिम् , अङ्गनालाभं स्त्रीप्राप्तिं च ददति। जान्वोः शत्रुजनादरिलोकात् क्षतिं विनाशम्। जङ्घयोः शस्त्रेण विनाशम्। गुल्फे स्थिता अध्वनि पथि बन्धने च क्लेशदायिनः कष्टप्रदा भवन्ति। तथा च पराशरः- **बृ.सं.,पृ-६१८**

यानाङ्गनालाभमूर्वोः। जान्वोरुपरि रिपुधातम्। शस्त्रेण विनाशम्। जङ्घयोर्गुल्फयोरध्व-बन्धपरिक्लेशागमः इति।।

अन्यदप्याह-

**स्फिक्पार्ष्णिपादजाता धननाशागम्यगमनमध्वानम्।**

**बन्धनमङ्गुलिनिचयेऽङ्गुष्ठे च ज्ञातिलोकतः पूजाम्।।८।।**

स्फिक्पार्ष्णिपादजाताः पिटका यथासङ्ख्यं धननाशागम्यगमनमध्वानं कुर्वन्ति। तत्र स्फिक्पार्ष्णि-जाता धननाशगम्यगमनम्। पादजाता अध्वानम्। अङ्गुलिनिचयेऽङ्गुलिसमूहे बन्धनम्। अङ्गुष्ठे ज्ञातिलोकेतो बन्धुजनात् पूजामाप्नोति लभते। पराशरः। **बृ.सं.,पृ-६१८**

स्पिजोरर्थहरणम्। पाष्र्योरगम्यगमनम्। पादयोरध्वगमनम्। नियमनमङ्गुल्याम्। अङ्गुष्ठेन जातिपूजाम् ।। इति।।

अत्रैव विशेषफलमाह-

**उत्पातगण्डपिटका दक्षिणतो वामतस्त्वभीघाताः।**

**धन्या भवन्ति पुंसां तद्विपरीताश्च नारीणाम्।।९।।**

अङ्गस्पन्दनमुत्पातः। गण्डपिटकौ प्रसिद्धौ। एते पुंसां पुरुषाणां दक्षिणतो धन्याः शुभा भवन्ति। दक्षिणशरीरार्धभागे इत्यर्थः। अभीघाताः प्रहाराः वामतो धन्याः। नारीणां स्त्रीणां तद्विपरीताश्च धन्याः। उत्पातगण्डपिटका वामतो दक्षिणतोऽभीघाता इति।।

अथान्येषामतिदेशार्थमाह-

**इति पिटकविभागः प्रोक्त आमूर्धतोऽयं व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः।**

**भवति मशकलक्ष्मावर्तजन्मापि तद्वन्निगदितफलकारि प्राणिनां देहसंस्थम्।।१०।।**

इत्येवं प्रकारः पिटकानां विभागो मया आमूर्धत आमस्तकात् प्रोक्तः कथितः। व्रणानां तिलकानां च विभागोऽप्येवमेव प्रकल्पयश्चिन्तीयः। येष्वङ्गेषु यत्फलं पिटकानां प्रोक्तं तदेव व्रणतिलकविभागे ज्ञेयम्। मशकः कृष्णो बिन्दुः। लक्ष्म प्रसिद्धम्। स्थाने लोमनिचय आवर्तो लोमावर्तैः। मशकलक्ष्मावर्तसम्भवमपि प्राणिनां सत्त्वानां देहसंस्थं शरीरेऽवसंस्थं तद्वतेनैव प्रकारेण निगदितफलकारि भवति। पिटकोक्तं फलं प्रयच्छतीत्यर्थः।।